॥ श्रीः ॥

प्रकरणसंग्रहः

भगवत्पादरचितापरोक्षानुभूतिर्विद्यारण्यरचितदीपिकोपेता
भगवत्पादरचितवाक्यवृत्तिरानन्दगिरिरचितटीकोपेता
भगवत्पादीयात्मबोधोऽमुकटीकोपेतः

अजितकृष्णेन
उट्टङ्क्य यथामति संशोध्य प्रकाशिता

2012-02-17

पूर्वपीठिका

ग्रन्थानुक्रमणिका

पूर्वपीठिका ii
अपरोक्षानुभूतिः 1
आत्मबोधः 39
अकारादिश्लोकसूची 58
ग्रन्थऋणम् 61

संक्षिप्ताक्षरसूची

संक्षिप्तम्	व्यस्तम्
क॰उ॰	कठोपनिषत्
छा॰उ॰	छान्दोग्योपनिषत्
तै॰उ॰	तैत्तिरीयोपनिषत्
बृ॰उ॰	बृहदारण्यकोपनिषत्
भ॰गी॰	भगवद्गीता
मा॰उ॰	माण्डूक्योपनिषत्
वाज॰सं॰	वाजसनेयसंहिता
श्वे॰उ॰	श्वेताश्वतरोपनिषत्

अपरोक्षानुभूत्या विषयानुक्रमणिका

श्लो॰	विषयः
१-२	उपोद्घातः
३-९	साधनचतुष्टयम्
१०-११	विचारस्यावश्यकता
१२-१६	विचारविवरणम् (विचारः सोऽयमीदृशः)
१७-२१	अज्ञानलक्षणम् (किमज्ञानमतः परम्)
२२	प्रकाशत्वम्
२३	मत्सम्बन्धः
२४-२८	ज्ञानलक्षणम् (ज्ञानमित्युच्यते बुधैः)

अपरोक्षानुभूतिः

स्वप्रकाशश्च हेतुर्यः परमात्मा चिदात्मकः
अपरोक्षानुभूताख्यः सोऽहमस्मि परं सुखम् १
ईशगुर्वात्मभेदाद्यः सकलव्यवहारभूः
औपाधिकः स्वचिन्मात्रः सोऽपरोक्षानुभूतिकः २
तदेवमनुसन्धाय निर्विघ्नां स्वेष्टदेवताम्
अपरोक्षानुभूताख्यामाचार्योक्तिं प्रकाशये ३
यद्यपीयं स्वतः स्पष्टा तथापि स्वात्मसिद्धये
यत्नोऽयं सोऽपि संक्षेपात् क्रियतेऽनर्थनाशनः ४
क्वाहमुल्काकरः क्वायं सूर्यस्तेजोनिधिः किल
तथापि भक्तिमान् कः किं न कुर्यात् स्वहिताप्तये ५

श्रीहरिं परमानन्दमुपदेष्टारमीश्वरम्
व्यापकं सर्वलोकानां कारणं तं नमाम्यहम् १

तत्राचार्याः स्वेष्टपरदेवताऽनुसन्धानलक्षणं मङ्गलं निर्विघ्नग्रन्थसमाप्तये स्वमनसि कृत्वा, शिष्यशिक्षायै ग्रन्थादौ निबध्नन्ति – श्रीहरिमिति । अहं तं नमामीत्यन्वयः ।

अत्रेयं प्रक्रिया । पदार्थो द्विविधः – आत्माऽनात्मा चेति । तत्रात्मा द्विविधः – ईश्वरो जीवश्चेति । एतावपि द्विविधौ शुद्धाऽशुद्धभेदात् । तत्राऽशुद्धौ मायाऽविद्योपाधित्वेन भेदव्यवहारहेतू, शुद्धौ त्वभेदव्यवहारहेतू । तथाऽनात्मापि त्रिविधः – कारणसूक्ष्मस्थूलभेदात् । एतदेव शरीरत्रयमिति व्यवह्रियते । एवं चिज्जडरूपवैलक्षण्यात् तमःप्रकाशयोरिव विभक्तयोरुभयोरात्मानात्मनोरविवेक एव बन्धकारणम् । तयोर्विवेकस्तु मोक्षकारणमिति दिक् ।

तत्र तावदहंशब्देन देहत्रयविशिष्टेनाशुद्धो जीवः । अस्यैवाकृष्टत्वात् तं नमामि । तं मायातत्कार्यहन्तृत्वेऽपि तदाश्रयभूतत्वेन सर्वकारणं वेदान्तप्रसिद्धमीश्वरम् । एतस्यैव सर्वोत्कृष्टत्वात् नमामि नमस्करोमि स्वात्मत्वेनानुसन्दधामीत्यर्थः । तस्यैव सर्वोत्कृष्टत्वेनानुसन्धानयोग्यत्वमाह – श्रीहरिमिति । श्रियं दधानमित्यर्थः । यद्वा – स्वाश्रयतया श्रियते स्वीक्रियते प्रलयसुषुप्त्यादौ सर्वभूतैरिति श्रीर्जीवत्वोपाधिभूताऽविद्या तां हरत्यात्मज्ञानप्रदानेन नाशयतीति श्रीहरिस्तम् । यद्वा – स एव सर्वाधिष्ठानतया श्रीरित्युच्यते । श्रीरेव हरिस्तम् ।

ननु – किमनेनऽविद्यातत्कार्यहरणेनेत्याशङ्क्य परमपुरुषार्थप्राप्तिर्भवतीति सूचयितुं तस्य परमानन्दरूपतामाह – परमानन्दमिति । परमोऽविनाशित्वनिरतिशयत्वाभ्यामुत्कृष्ट आनन्दः सुखविशेषस्तद्रूपमित्यर्थः । तर्हि वैषयिकसुखवज्जडः स्यादित्यत आह – उपदेष्टारमिति[1] । आचार्यद्वाराऽऽत्मसुखोपदेशकं चिद्रूपमित्यर्थः ।

ननु – केवलानन्दस्य कथमुपदेष्टृत्वमित्यत आह – ईश्वरमिति । ईष्टेऽसावीश्वरः विचित्रशक्तित्वात् सर्वसमर्थस्तं नमामीत्यन्वयः । एवमपि परिच्छिन्नत्वात् घटादिवदनात्मत्वं स्यादित्यत आह – व्यापकमिति । स्वसत्ताप्रकाशाभ्यां नामरूपे व्याप्नोति स व्यापकस्तं परिच्छेदकस्य देशकालादेर्मायित्कत्वादनन्तमित्यर्थः ।

ननु – व्याप्यव्यापकभावेनानन्तत्वमसिद्धमित्यत आह – सर्वलोकानां कारणमिति । अभिन्ननिमित्तोपादानमित्यर्थः । "सत्यं ज्ञानमनन्तं ब्रह्म" (तै०उ०२.१.१), "आत्मनात्मानमभिसंविवेश" (वाज०सं०३२.११) इत्यादिश्रुतेः ॥१॥

> अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये
> सद्भिरेव प्रयत्नेन वीक्षणीया मुहुर्मुहुः २

इदानीं प्रेक्षावत्प्रवृत्तय अनुबन्धचतुष्टयं दर्शयन् स्वचिकीर्षितं प्रतिजानीते – अपरोक्षेति । वै इत्यव्ययेन विद्वदनुभवं प्रमाणयति । तथा चायमर्थः – विद्वदनुभवप्रसिद्धा या तत्त्वमस्यादिमहावाक्यश्रवणजा प्रत्यगभिन्नविषया ऽपरोक्षानुभूतिः । अक्षाणामिन्द्रियाणां परमतीतं न भवतीत्यपरोक्षम् । इन्द्रियाधिष्ठानतत्प्रकाशत्वाभ्यां नित्यप्रत्यक्षस्वप्रकाशात्मतत्वं, तस्यानुभूतिर्वृत्त्यारूढाखण्डता ।

यद्वा – अपरोक्षा चासावनुभूतिश्चेत्यपरोक्षानुभूतिर्विद्याऽपरपर्यायो ब्रह्मसाक्षात्कारः । तत्साधनग्रन्थोऽप्युपनिषच्छब्दवदपरोक्षानुभूतिशब्देनोपचर्यते । झटित्यवलोकन-मात्रेणैवोत्तमाधकारिणां ब्रह्मात्मसाक्षात्कारकारणं ग्रन्थविशेष इत्यर्थः । अनेन नित्यापरोक्षब्रह्मात्म-तत्त्वविषयो यो दर्शितः, स प्रोच्यते । प्रकर्षेण तत्तदाशङ्कानिराकरणपूर्वकं सिद्धान्तरहस्य-प्रदर्शनरूपेणोच्यते, कथ्यत इत्यर्थः । अस्माभिः पूर्वाचार्यैरित्यर्थादध्याहारः ।

ननु – प्रायः "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति न्यायान्नारम्भणीयो ग्रन्थ इत्याशङ्क्य प्रयोजनमाह – मोक्षसिद्धय इति । मोक्षो नाम स्वाविद्याकल्पितानात्म-देहाद्यात्मत्वाभिमानरूपबन्धनिवृत्तिद्वारा स्वस्वरूपावस्थानम्, तस्य सिद्धिः प्राप्तिस्तदर्थम् । अनेन सर्वानर्थनिवृत्तिद्वारा परमानन्दावाप्तिरूपं प्रयोजनं दर्शितम् । किंलक्षणाऽपरोक्षानुभूतिः ? सद्भिः

[1] उप + दिश् + तृच् इति विद्यारण्यः । उप + दिश् + तृन् इति अखण्डानन्दसरस्वती ।

साधुभिर्नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्नैर्मुमुक्षुभिरित्यर्थः । एवशब्दादन्यैः कर्मोपासनाधिकारिभिरिति भावः । मुहुर्मुहुर्नैरन्तर्यदीर्घकालाभ्यासप्रयत्नेन स्नानभिक्षादावप्यनादरं कृत्वेत्यर्थः । वीक्षणीया गुरुमुखादवगत्य विचारणीया । अनेन मुमुक्षुरधिकारी दर्शितः । एतेनैवार्थात् पूर्वकाण्डोत्तरकाण्डयोः साध्यसाधनभावः सम्बन्धश्च दर्शितो भवतीति बोद्धव्यम् ॥२॥

> स्ववर्णाश्रमधर्मेण तपसा हरितोषणात्
> साधनं [2]प्रभवेत् पुंसां वैराग्यादिचतुष्टयम् ३

ननु – कार्यस्य कारणाधीनत्वात् पूर्वोक्तसाधनचतुष्टयस्य किं कारणमित्याशङ्क्याह – स्ववर्णेति । अत्र स्वशब्देन मुख्यगौणमिथ्याभेदेन त्रिविधेषु साक्षिपुत्रादिदेहादिलक्षणेष्वात्मसु मध्ये मिथात्मायोग्यत्वाद् गृह्यते । तस्य देहादेर्ब्राह्मणादिवर्णब्रह्मचर्याद्याश्रमप्रयुक्तेन धर्मेण ब्रह्मार्पणकृतकर्मानुष्ठानजन्येनापूर्वेण पूर्वमीमांसाप्रसिद्धेन भाविफलाधारभूतेन पुण्यादिशब्द-वाच्येनेतर्थः । तथा तपसा कृच्छ्रचान्द्रायणादिना प्रायश्चित्तेनेत्यर्थः । पुनः हरितोषणाद् भगवत्प्रीतिकरात् सर्वभूतदयालक्षणात् कर्मविशेषात् । एतैस्त्रिभिः साधनैः वैराग्यादिचतुष्टयरूपं साधनं मोक्षसाधको धर्मविशेषः पुंसां प्रभवेत् । सम्भावनायां लिङ् ।

यद्वैवमन्वयः – स्ववर्णाश्रमधर्मरूपेण तपसा कृत्वा यद्धरितोषणं, तस्मादिति । यद्यपि साधनचतुष्टयस्य विवेकादिक्रमेण हेतुहेतुमद्भावस्तथापि वैराग्यस्यासाधारणकारणतां द्योतयितुमादौ ग्रहणं कृतमिति बोद्धव्यम् ॥३॥

> ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु
> यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम् ४

कीदृशं तद्वैराग्यादिचतुषयमित्याकाङ्क्षायां तत्स्वयमेव व्याचष्टे – “ब्रह्मादि” (४) इत्यारभ्य, “वक्तव्या सा मुमुक्षुता” (९) इत्यन्तेन श्लोकषट्कात्मकेन ग्रन्थेन । तत्रादौ वैराग्यस्य लक्षणमाह – ब्रह्मादिस्थावरान्तेष्विति । ब्रह्मादिस्थावरान्तेषु सत्यलोकादिमर्त्यलोकान्तेषु साधनेष्वनु, कर्मजन्यत्वेनानित्यत्वं लक्षीकृत्येत्यर्थः । वैराग्यमिच्छाराहित्यम् । तत्र दृष्टान्तमाह – यथैवेति ।

यथैव काकविष्ठायां वैराग्यम् । गर्दभादिविष्ठायामपि कदाचित् कस्यचित् ज्वरशान्त्यर्थं ग्रहणेच्छा भवति, अतः काकविष्ठाया ग्रहणम् । उपलक्षणमेतत् वान्त्यादीनाम् । विषयेष्विच्छानुदये वैराग्यस्य हेतुगर्भितं विशेषणमाह – तदिति । हि यस्मात्तद्वैराग्यं निर्मलं रागादिमलरहितम् ॥४॥

[2] साधनं च भवेदिति पाठान्तरम् ।

नित्यमात्मस्वरूपं हि दृश्यं तद्विपरीतगम् एवं यो निश्चयः सम्यग्विवेको वस्तुनः स वै ५

इदानीं वैराग्यकारणं विवेकं लक्षयति – नित्यमिति । वै प्रसिद्धं सः वस्तुनः पदार्थस्य विवेकः । विवेचनविशेषो ज्ञेयः । सः क इत्यत आह – एवमिति । य एवंप्रकारेण सम्यक् संशयादिशून्यो निश्चयः । एवं कथमित्यत आह – नित्यमिति । हीति विद्वदनुभवप्रसिद्धमात्मस्वरूपं नित्यमविनाशि । अबाध्यं सत्यमित्यर्थः । "अविनाशी वा अरेऽयमात्मा" (बृ०उ०४.५.१४) इति श्रुतेः । दृश्यमानमात्मस्वरूपं तद्विपरीतगम् । तदात्मस्वरूपं, तस्माद् विपररीतत्वेन गच्छति प्राप्नोति व्यवहारभूमिमिति तथाविधं विनाशि बाध्यमित्यर्थः ।

अत्रेदमनुमानमपि सूचितं भवति – आत्मस्वरूपं नित्यं द्रष्टृत्वात् , यन्न नित्यं तन्न द्रष्टृ, यथा घटादीति, केवलव्यतिरेकी[3] हेतुः । तथाऽनात्मस्वरूपमनित्यं दृश्यत्वात्, यन्नानित्यं तन्न दृश्यं, यथात्मस्वरूपमिति, अयमपि केवलव्यतिरेकी हेतुः ॥५॥

सदैव वासनात्यागः शमोऽयमिति शब्दितः निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ६

तदेवं वैराग्यकारणं विवेकं व्याख्याय वैराग्यकार्यं शमादिषट्कं लक्षयति – सदैवेत्यादित्रिभिः श्लोकैः । सदैव सर्वस्मिन्नपि काले वासनात्यागः पूर्वसंस्कारोपेक्षाऽयं शम इति शब्दितः । अन्तःकरणनिग्रहः शमशब्दार्थः । बाह्यवृत्तीनां श्रोत्रवागादीनां निग्रहो निषिद्धप्रवृत्तितिरस्कारो दम इति शब्देनाभिधीयते कथ्यते ॥६॥

विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा सहनं सर्वदुःखानां तितिक्षा सा शुभा मता ७

विषयेभ्य इति । हीति प्रसिद्धेभ्यो बन्धकेभ्यः शब्दादिभ्यो या परावृत्तिर्निवृत्तिरनित्यत्वादिदोषदर्शनेन ग्रहणानिच्छा सोपरतिरुच्यत इत्यर्थः । कीदृशी सेत्यत आह – परमेति । परमुत्कृष्टमात्मज्ञानं यस्याः सकाशाज्जायते, सा परमा, आत्मज्ञानसाधनभूतेत्यर्थः । अनया सर्वकर्मसन्न्यासो लक्ष्यते । किञ्च सहनमिति सर्वदुःखानां सर्वदुःखसाधनानां शीतोष्णादिद्वन्द्वानां यत् सहनं प्रतीकारानिच्छा, सा शुभा सुखरूपा तितिक्षा मता विदुषामित्यर्थः ॥७॥

[3] अ → क । ! क → ! अ = केवलव्यतिरेकी

> निगमाचार्यवाक्येषु भक्तिः श्रद्धेति विश्रुता
> चित्तैकाग्र्यं तु सल्लक्ष्ये समाधानमिति स्मृतम् ८

निगमेति । निगमाचार्यवाक्येषु वेदगुरुवचनेषु । यद्वा – उपनिषद्व्याख्यातृपदेशेषु भक्तिर्भजनं विश्वास इत्यर्थः । सा श्रद्धेति विश्रुता वेदान्तप्रसिद्धा । तु पुनः सल्लक्ष्ये "सदेव सोम्येदमग्र आसीत्" (छा०उ०२.१) इत्यादिश्रुतिलक्ष्ये प्रत्यगभिन्ने ब्रह्मणि चित्तैकाग्र्यं तदेकजिज्ञासेत्यर्थः । तत् समाधानमिति स्मृतम् ॥८॥

> संसारबन्धनिर्मुक्तिः कथं मे स्यात् कदा विधे
> इति या सुदृढा बुद्धिर्वक्तव्या सा मुमुक्षुता ९

एवं शमादिषट्कमभिधायैतत्कार्यभूतां मुमुक्षुतामाह – संसारबन्धेति । इति या सुदृढा बुद्धिः, सा मुमुक्षुता वक्तव्येत्यन्वयः । सा केत्यत आह – संसारेति । भो विधे मद्दैव ! यद्वा सर्वकर्तर्विधातर्ब्रह्मन्[4] ! मे मम संसारबन्धनिर्मुक्तिर्नानायोनिसम्बन्धनिवृत्तिः कदा कस्मिन् काले, कथं केन प्रकारेण भवेतित्येवंरूपा बुद्धिर्मुमुक्षुतेत्यर्थः ॥९॥

> उक्तसाधनयुक्तेन विचारः पुरुषेण हि
> कर्त्तव्यो ज्ञानसिद्ध्यर्थमात्मनः शुभमिच्छता १०

इदं साधनचतुष्टयं यदर्थमुपन्यस्तं, तदिदानीं दर्शयति – उक्तेति । उक्तानि – "ब्रह्मादि" इत्यारभ्य "वक्तव्या सा मुमुक्षुता" इत्यन्तग्रन्थसन्दर्भेण वर्णितानि यानि वैराग्यादिसाधनानि ज्ञानोपकरणानि, तैर्युक्तेन पुरुषेणाधिकारिणा देहवता मनुष्योत्तमेन । हीति विद्वत्प्रसिद्धत्वेन वक्ष्यमाणलक्षणः । यद्वा – हीत्यव्ययमेवार्थेऽन्यनिषेधार्थ इत्यर्थः । विचारो विवेकः कर्तव्य आवर्तयितव्यः । किमर्थमित्यत आह – ज्ञानसिद्ध्यर्थमिति । आत्मनो ज्ञानसिद्ध्यर्थं ब्रह्मात्मैक्यबोधोद्भावनाय ।

ननु – आत्मज्ञानसिद्ध्या कः पुरुषार्थ इत्याशङ्क्य मोक्षाख्यं चतुर्थपुरुषार्थरूपं फलं द्योतयन् पुरुषार्थं विशिनष्टि – शुभमिति । शुभं परमानन्दरूपत्वेन मङ्गलं मोक्षसुखमित्यर्थः । इच्छता प्रार्थयता । आत्मनः शुभमिति वाऽन्वयः ॥१०॥

---

[4] विधिः सोपाधिको निरुपाधिको वेत्यर्थः ।

नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः यथा पदार्थभानं हि प्रकाशेन विना क्वचित् ११

ननु – ज्ञानसिद्ध्यर्थं विचार एव कर्तव्य इति नियमः कुतः क्रियत इत्याशङ्क्य, सदृष्टान्तमाह – नोत्पद्यत इति। विचारेण विना ऽन्यसाधनैः कर्मोपासनालक्षणैः ज्ञानं नोत्पद्यते। तत्र दृष्टान्तमाह – यथेति। यथा क्वचित् कस्मिंश्चिद्देशे सूर्यादिप्रकाशेन विना पदार्थभानं घटादिवस्तुप्रकाशो न भवति। हीति सर्वजनप्रसिद्धम्। अतो नियमः क्रियत इति भावः ॥११॥

कोऽहं कथमिदं जातं को वै कर्ताऽस्य विद्यते उपादानं किमस्तीह विचारः सोऽयमीदृशः १२

तर्हि स विचारः कीदृश इत्यत आह – कोऽहमिति। अहं कर्ता सुखीत्यादिव्यवह्रियमाणः कः किंस्वरूपः ? तथा इदं जगत् स्थावरजङ्गमात्मकं कथं कस्माज्जातम् ? किमधिष्ठानमित्यर्थः। तथाऽस्य प्रत्यक्षादिप्रमाणसिद्धस्य जगतः कर्तोत्पादकः को विद्यते ? वै इति विकल्पं द्योतयति। किं जीवदृष्टं कतृ, किं वेश्वरः, किं वाऽन्यदेव किञ्चिदिति विकल्पः। किञ्चेह जगत्युपादानं घटस्य मृद्वत् किमस्ति ? अयमात्मा जगत्कारणविषयः – ईदृश एवंस्वरूपो विचारः। स एव ज्ञानसाधनमित्यर्थः ॥१२॥

नाहं भूतगणो देहो नाहं चाक्षगणस्तथा एतद्विलक्षणः कश्चिद्विचारः सोऽयमीदृशः १३

ननु – "चैतन्यविशिष्टः कायः पुरुषः" इति बार्हस्पत्यसूत्राद्देहाकारेण परिणतानि पृथिव्यादिचत्वारिभूतान्येवात्मेति चार्वाकाः वदन्ति। स एव कर्ता सुखीत्यादिसर्वव्यवहारमूलमिति सर्वजनप्रसिद्धौ सत्याम्, आत्मविषयो विचारो न स्यादित्यत आह – नाहमिति। अहमहंशब्दप्रत्ययालम्बनः प्रत्यगात्मा। भूतगणो यो देहः, स न भवामि, तस्य घटादिवद् दृश्यत्वादित्यर्थः।

"तर्हीन्द्रियगणस्त्वं स्या" इति चार्वाकैकदेशिमतमुत्थाप्य दूषयति – नाहं चेति। च पुनरक्षगणः श्रोत्रादीन्द्रियसङ्घातोऽप्यहं न भवामि। तथेतिपदेन देहवदिन्द्रियगणस्यापि भूतविकारत्वं दर्शितम्। "स वा एष पुरुषोऽन्नरसमयः" (तै०उ०), "अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्" (छा०उ०२.५) इत्यादिश्रुतिरुभयत्र प्रमाणम्।

ननु – यदि देहद्वयं त्वं नासि, तर्हि शून्यमेव स्यादित्याशङ्क्याह – एतदिति। एतद्विलक्षणः एताभ्यां स्थूलसूक्ष्मदेहाभ्यां विपरीतधर्मकोऽस्मि। "अस्थूलमनण्वह्रस्वम्" (बृ०उ०३.८.८)

इत्यादिश्रुतेः । कश्चिदिति – जात्यादिरहितत्वान्मनोवाचामगोचरत्वं दर्शितम् । अयमीदृशः स विचार इति व्याख्यातार्थश्चतुर्थः पादः श्लोकचतुष्टयेऽपि बोद्धव्यः ॥१३॥

> अज्ञानप्रभवं सर्वं ज्ञानेन प्रविलीयते
> सङ्कल्पो विविधः कर्त्ता विचारः सोऽयमीदृशः १४

तदेवं कोऽहमित्येतन्निश्चित्येदानीं कथमिदं जातमित्यस्य निश्चयः क्रियते । तत्र "पृथिव्यादिभूतानि कार्यत्वात् स्वस्वपरमाणुभ्यो जायन्ते" इति तार्किकादयो मन्यन्ते । कर्मणो जायन्त इति मीमांसकाः । प्रधानादेवेति साङ्ख्याः । तदेतन्निराकुर्वन्नाह – अज्ञानेति ।

सर्वं जगदिदं नामरूपात्मकमज्ञानप्रभवमज्ञानात् पूर्वोक्तस्वस्वरूपास्फुरणात् प्रभवति । तथाविधम्, अत एवैतद्विरोधिना ज्ञानेन स्वस्वरूपस्फुरणेन तम एव प्रकाशेन प्रविलीयते, निःशेषलीनं भवतीत्यर्थः ।

को वै कर्त्तेत्यस्य निर्णयमाह – सङ्कल्प इति । विविधो नानाप्रकारः सङ्कल्पः, इदं करिष्यामीत्यादिलक्षणोऽन्तःकरणपरिणामः । कारणानुकूलव्यापारवान् कर्त्ता । शेषं पूर्वोक्तम् ॥१४॥

> एतयोर्यदुपादानमेकं सूक्ष्मं सदव्ययम्
> यथैव मृद्घटादीनां विचारः सोऽयमीदृशः १५

अथोपादानं किमस्तीत्यस्य निर्णयमाह – एतयोरिति । एतयोरज्ञानसङ्कल्पयोर्यदुपादानमुत्पत्तिस्थितिनाशाय कारणं[5] तत्तु सत्, कालत्रयाबाध्यं ब्रह्मैव, नान्यदित्यर्थः । अत एवाधिष्ठानज्ञाननिर्वृत्त्याऽज्ञानकार्यत्वेन मिथ्याभूतमपि जगत् यावज्ज्ञानोदयं रज्जुसर्पादिवत् संसारभयव्यवहारक्षमं भवेदिति भावः । ब्रह्मणः सत्त्वे हेतुः – अव्ययमिति । अव्ययमपक्षयरहितम् । अनेनैतत्पूर्वभूता अपि जन्मादिविकारा निरस्ताः, नाशश्च निरस्तः । षड्भावविकारराहित्ये हेतुरेकं सजातीयादिभेदशून्यम् । तद्धि कुतो न दृश्यते ? तत्राह – सूक्ष्ममिति । सूक्ष्मं मनोवागादीन्द्रियागोचरम् । तेषां प्रवृत्तिनिमित्तजातिक्रियादिशून्यत्वादित्यर्थः । ब्रह्मण उपादानत्वे दृष्टान्तमाह – यथैवेति । यथैव मृद्घटादीनामुपादानं तथैवेत्यर्थः । एवंप्रकारेण । कार्यकारणभेदो नाममात्रमिति सूचितम् ॥१५॥

---

[5] अज्ञानं माया च अनादी । अनयोरुपादानं सत्, परन्तु अनयोर्कारणं नास्तीति स्मर्तव्यम् । तात्पर्यमिदं -- सङ्कल्पमात्रस्य उत्पत्तिस्थितिनाशो, न तु मायायाः ।

> अहमेकोऽपि सूक्ष्मश्च ज्ञाता साक्षी सदव्ययः
> तदहं नात्र सन्देहो विचारः सोऽयमीदृशः १६

ननु – यद्यपि कार्यकारणभेदो वाचारम्भणमात्रस्तथापि जीवब्रह्मणोर्भेदो वास्तवः स्यादित्याशङ्क्याह – अहमिति । अत्र यत इत्यधाहारः । तथा चायमर्थः – यतोऽहमहंप्रत्ययवेद्यो ऽप्येकः सजातीयादिभेदशून्यः । मनुष्यमात्रेऽप्यहंबुद्धेरेकत्वप्रतीतेरित्यर्थः । च पुनः सूक्ष्म इन्द्रियागोचरः । पुनर्ज्ञाताऽहङ्कारादिप्रकाशत्वेन चेतन इत्यर्थः । तथा साक्षी – साक्षादिन्द्रियार्थसन्निकर्षं विनैवेक्षते पश्यति प्रकाशयतीति साक्षी, निर्विकार इत्यर्थः । अत एव सदव्ययः संश्चासावव्ययश्च, विनाशापक्षयोपलक्षितसर्वविकारशून्य इत्यर्थः । यस्मादेवंभूतोऽहं, तत्तस्मादहंप्रत्ययवेद्यस्तत् सत्यज्ञानादिलक्षणं ब्रह्म । अत्र सन्देहो नास्तीत्यर्थः । सोऽयमीदृशो विचार इति ॥१६॥

> आत्मा विनिष्कलो ह्येको देहो बहुभिरावृतः
> तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् १७

एतदेव जीवब्रह्मैक्यज्ञानप्रदर्शनेन द्रढयति – आत्मेत्यादिपञ्चभिः । यतोऽप्रत्ययवेद्य आत्मा – अतति संततभावेन जाग्रदादिसर्वावस्थास्वनुवर्त्तत इत्यात्मा, अवस्थात्रयभावाभावसाक्षित्वेन सत्यज्ञानादिस्वरूप इत्यर्थः । स त्वंपदलक्ष्यार्थोऽपि तत्पदलक्ष्यार्थ एव । विनिष्कलो विशेषेण निर्गतकलो निरवयव इत्यर्थः । अन्यथा सावयवत्वे घटादिवद्विनाशित्वापत्तिरिति भावः । अत्र हेतुः – एकः । हीति "एकमेवाद्वितीयम्" (छा०उ०)इत्यादिश्रुतिप्रसिद्धं द्योतयति ।

ननु – तथा लिङ्गदेहोऽप्यस्ति चेन्नेत्याह । देह इति । देहो लिङ्गदेहः सूक्ष्मशरीरमिति यावत् । स बहुभिः कलाभिः श्रोत्रादिबुद्ध्यन्ताभिः सप्तदशभिरावृत आच्छादितस्तत्सङ्घात इत्यर्थः । अत एव लिङ्गदेहस्य निरवयवत्वाद्यभावात् ज्ञानेन तत्कारणाज्ञाननिवृत्तौ निव्रित्तिरन्यथाऽनिर्मोक्षप्रसङ्ग इति भावः । एवमतिवैलक्षण्ये सत्यपि तयोरात्मदेहयोः प्रकाशतमसोरिवैक्यमैकात्म्यं प्रपश्यन्ति तार्किकादय इत्यर्थः । अतो विपरीतदर्शनात् परमन्यदज्ञानं किमस्ति ? एतदेवाज्ञानमित्यर्थः । निपर्ययरूपकर्मान्यथानुपपत्त्या तत्कारणं मूलाऽज्ञानं कल्प्यत इति भावः ॥१७॥

> आत्मा नियामकश्चान्तर्देहो बाह्यो नियम्यकः
> तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् १८

पुनर्वैलक्षण्यमाह – आत्मेति । आत्मा नियामको नियन्ता । च पुनरन्तः पञ्चकोशान्तरः, देहस्तु नियम्यः सन् बाह्यः । तयोरैक्यमित्युत्तरार्धं व्याख्यातम् । एवमग्रेऽपि ज्ञेयम् ॥१८॥

आत्मा ज्ञानमयः पुण्यो देहो मांसमयोऽशुचिः तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् १९

अन्यदपि वैलक्षण्यमाह – आत्मेति । आत्मा ज्ञानमयः प्रकाशरूपोऽत एव पुण्यः शुद्धः । देहस्तु मांसादिविकारवानतः एवाशुचिः । एतेनात्मनः स्थूलदेहादपि वैलक्ष्यण्यमुक्तं भवति । तयोरैक्यमित्यादि पूर्ववत् ॥१॥

आत्मा प्रकाशकः स्वच्छो देहस्तामस उच्यते तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् २०

वैलक्षण्यान्तरमाह – आत्मेति । आत्मा स्वयंप्रकाशः सन् सूर्यादिवदन्यसर्वप्रकाशकोऽत एव स्वच्छः, प्रकाश्यगुणदोषसम्बन्धशून्य इत्यर्थः । "असङ्गो ह्ययं पुरुष" (बृ०उ०)इति श्रुतेः । देहस्तु तामसो घटादिवत् प्रकाश्यत्वेन जडः । तयोरैक्यमित्यादि पूर्ववत् ॥२०॥

आत्मा नित्यो हि सद्रूपो देहोऽनित्यो ह्यसन्मयः तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् २१

अत्र सर्वत्र पौनक्त्यं नाशङ्कनीयम् । आत्मनोऽलौकिकत्वेनात्यन्तदुर्बोधत्वादेव बहुधा वैलक्षणं प्रदर्श्यते परमकारुणिकैः श्रीमदाचार्यैः – आत्मेति । आत्मा नित्यो ध्वंसाप्रतियोगी । तत्र हेतुः – हि यस्मात् सद्रूप अबाध्यस्वरूपः । देहस्तु ध्वंसप्रतियोगी । अत्रापि हेतुः – हि यस्मादसन्मयोऽनित्यो विकारित्वेन बाधयोग्य इत्यर्थः । यस्मादेवमात्मदेहयोरत्यन्तवैलक्षण्यं तस्मात् तयोरैक्यदर्शनं केवलमज्ञानमिति ॥२१॥

आत्मनस्तत्प्रकाशत्वं यत्पदार्थावभासनम् नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यान्ध्यं यतो निशि २२

ननु – आत्मनः प्रकाशत्वं किं नामेत्यत आह – आत्मन इति । आत्मनस्तत् प्रकाशत्वं बोद्धव्यम् । किं तदित्यत आह – यदिति । यदिति यत्पदार्थावभासनं घटपटादिवस्तुविषयप्रकाश इदन्तया निर्दिश्यमानविषयदर्शनमिति यावत् । तर्ह्यग्न्यादिप्रकाशवद् विकारित्वं स्यादित्यत आह – नाग्न्यादिदीप्तिवद्दीप्तिरिति । इयमात्मदीप्तिरग्न्यादिदीप्तिवन्न, कदाचिदुत्पत्तिविनाशादिविकारवती नेत्यर्थः । तत्र हेतुमाह – भवतीति । भवत्यान्ध्यं यतो निशि – यतः कारणान्निशिरात्रावग्न्यादि-प्रकाश एकस्मिन् देशे सत्यपि, तदन्यत्र लोकस्यान्ध्यं रूपग्रहाक्षमत्वं भवति, नैतादृश्यात्मदीप्तिरेकत्र विद्यमाना चैकत्राऽविद्यमाना परिच्छिन्ना नास्ति । किन्तु दीपादिरूपस्याग्न्यादिप्रकाशस्य प्रकाशिका, तदभावे चान्धकारस्य प्रकाशिका उत्पत्तिनाशरहिता च सदा सर्वत्र पूर्णैवास्ति ।

यद्वा – इयमात्मदीप्तिरग्न्यादिदीप्तिसदृशी न, कुतः ? यतः कारणान्निशि रात्रावाध्यमन्धकारो भवत्यतस्तद्विलक्षणात्मदीप्तिर्ज्ञेया । यद्यात्मदीप्तिरग्न्यादिदीप्तिसदृशी भवेत्तर्ह्यग्न्यादिदीप्त्या यथाधकारस्य नाशो भवति, तथात्मदीप्त्याऽप्यन्धकारस्य नाशः स्यात् । परन्त्वात्मनः सत्ताप्रकाशाभ्यां सर्वत्र सर्वदा विद्यमानत्वेऽप्यन्धकारस्य नाशो न भवत्यत आत्मदीप्तिरग्न्यदि-दीप्तिसदृशी न, किन्तु इयमग्न्यादिदीप्तिर्भातीदमान्ध्यं भातीत्याद्याकारेण अग्न्यादिदीप्तेरान्ध्यस्य चान्यस्य सर्वस्य च प्रकाशिका चाविरोधिन्यात्मदीप्तिः स्वपराशैवाभ्युपेतव्या सर्वैरात्मज्ञानारूढैरित्यर्थः । तस्मादग्न्यादिदीप्तीनामपि दीपिकाऽन्यसाधननिरपेक्षा या दीप्तिः सा आत्मप्रकाश इति भावः ॥२२॥

देहोऽहमित्ययं मूढो धृत्वा तिष्ठत्यहो जनः
ममायमित्यपि ज्ञात्वा घटद्रष्टेव सर्वदा २३

तदेवं प्रकाश्यप्रकाशकत्वादिलक्षणवैलक्षण्ये सत्यपि आत्मानात्मभेददर्शितमुपसंहरन्, उभयोर्भेदं स्पष्टयति – देह इति । अहमहंशब्दप्रत्ययालम्बनः प्रत्यगात्माऽयमिदन्तया निर्दिश्यमानो घटादिवत् प्रत्यक्षतया दृश्यमानो देहोऽस्मीत्युभयोर्द्रष्टृदृश्ययोरैक्यं कृत्वा मूढः – स्वाज्ञानकार्य-विपर्ययमोहव्याप्तो जनस्तिष्ठति, कृतकृत्यबुद्ध्या निर्व्यापारो भवतीत्यर्थः । एतदहो ! महदज्ञानमिति भावः । कीं कृत्वापीत्यत आह – ममेति । मम मत्सम्बन्ध्ययं देह इति सामान्यतो भेदं ज्ञात्वाऽपि । अत एवाश्चर्यमिति तात्पर्यम् । क एव सर्वदा घटद्रष्टेव । यथा सर्वकाले घटद्रष्टा पुरुषो "ममायं घट" इति जानाति, न तु "अहं घट" इति, कदाचिदपि जानातीत्यर्थः ॥२३॥

ब्रह्मैवाहं समः शान्तः सच्चिदानन्दलक्षणः
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः २४

नन्वेतस्मिण्स्तद्बुद्धिरितिलक्षणभ्रमापरपर्यायमोहकार्यलिङ्गानुमेयमज्ञानमीदृक् तर्हि तन्निवर्तकं किमित्याकाङ्क्षायां तद्विरोधित्वादात्मज्ञानमेवात्माऽज्ञाननिवर्तकमित्यभिप्रेत्य तल्लक्षणमाह – ब्रह्मेत्यादिपञ्चभिः । अहमहंशब्दप्रत्ययालम्बनः प्रत्यगात्मा ब्रह्मैवास्मि । एतयोस्तत्त्वंपदार्थयोरैक्ये हेतुगर्भितानि विशेशणान्याह – सम इति । समः सत्ताप्रकाशाभ्यां सर्वाभिन्नः । पुनः किंलक्षणः ? शान्तः निरस्तसमस्तोपाधित्वाद् विक्षेपादिविकारशून्यः । पुनः किंलक्षणः ? सच्चिदानन्दलक्षणः सच्चिदानन्दिअरनृतजडदुःखप्रतियोगिभिर्लक्ष्यते, विरुद्धांशत्यागरूपया भागलक्षणया ज्ञायत इति सच्चिदानन्दलक्षणः । ब्रह्मबोधे हि द्विविधं द्वारं – विधिर्निषधश्चेति । तत्र सत्यज्ञानादिसाक्षाद्वाचकशब्दप्रयोगलक्षणो विधिरुक्तः । इदानीमतन्निरसनलक्षणो निषेधः प्रदर्श्यते – नाहमिति । अहमहम्शब्दप्रत्ययालम्बन आत्मा देहो नेत्यन्वयः । देह इत्युपलक्षणं प्राणेन्द्रियादीनामपि । हीति विद्वज्जनप्रसिद्धम् । देहादेरनात्मत्वे हेतुमाह – असदिति । असद्रूपोसद्बोध्यमनृतं तादृग्रूपं स्वरूपं यस्य स तथाविधः । एत्येवंप्रकारं "अहं

ब्रह्मासि" इत्यादिमहावाक्यजन्याऽखण्डाकारबुद्धिरूपं ज्ञानं बुदैरात्मतत्त्वज्ञैरुच्यते, कथ्यत इत्यर्थः । एतद्विलक्षणः सर्वो ज्ञानाभास इति भावः ॥२४॥

> निर्विकारो निराकारो निरवद्योहमव्ययः
> नाहं देहो स्यसद्रूपो ज्ञानमित्युच्यते बुधैः २५

ननु – अहं जातो मृतः सुखी दुःखीत्यादनेकविकारत्वेनाहंशब्दप्रत्ययालम्बनस्य प्रतीयमानत्वात् कथं तस्य ब्रह्मत्वमित्यत आह – निर्विकार इति । अहमहंशब्दप्रत्ययालम्बनः प्रत्यगात्मा निर्विकारोऽस्मीति शेषः । निर्गता विकारा जन्मादयो यस्मात् स तथाविधः । तेषां देहधर्मत्वादिति भावः । तत्र हेतुः – निराकारः देहाद्याकाररहितः । अत एव निरवद्यो वातपित्तादिजन्याध्यात्मिकादितापत्रयरहितः इत्यर्थः । अत एवाऽव्ययः अपक्षयादिरहित इत्यर्थः । अहं मनुष्य इत्यादिप्रतीतेः कथम् निर्विकारत्वमिति चेत् सा प्रतीतिः शुक्तिरजतादिवत् बाध्यत्वाद् भ्रान्तिरित्यताह – नाहमिति । नाहमित्युत्तरार्धं व्याख्यातं पूर्वश्लोके । एवमुत्तरत्रापि ज्ञेयम् । पुनरुक्तिस्तु ज्ञानप्रतिबन्धकस्य बुद्धिमान्द्यविपर्यायादेदार्ढ्यान्नाशङ्कनीया ॥२५॥

> निरामयो निराभासो निर्विकल्पोऽहमाततः
> नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः २६

पुनः किंलक्षणं ज्ञानमित्यत आह – निरामय आह । अहं निरामयः सर्वरोगरहितः, निराभासो वृत्तिव्याप्यत्वेऽपि फलव्याप्यत्वशून्यः, निर्विकल्पः कल्पनाहीनः, आततः व्यापकः ॥२६॥

> निर्गुणो निष्क्रियो नित्यो नित्यमुक्तोऽहमच्युतः
> नाहं देहो ह्यसद्रोओपो ज्ञानमित्युच्यते बुधैः २७

पुनः किंलक्षणं ज्ञानमित्यत आह – निर्गुण इति । अहं निर्गुणो – गुणरहितः, गुणानां मायामयत्वादित्यर्थः । अत एव निष्क्रियः क्रियारहितः, तथा नित्यः विनाशरहितः, अत एव नित्यमुक्तः, कालत्रयेऽपि बन्धशून्यः । तत्र हेतुः – अच्युतः अप्रच्युतसच्चिदानन्दस्वभावः ॥२७॥

> निर्मलो निश्चलोऽनन्तः शुद्धोऽहमजरोऽमरः
> नाहं देहो न्यसद्रूपो ज्ञानमित्युच्यते बुधैः २८

पुनरपि ज्ञानलक्षणमाह – निर्मल इति । अहं निर्मलः अचिद्यातत्कार्यलक्षणमलरहितः, अत एव निश्चलः व्यापकत्वादाकाशवन्निश्चल इत्यर्थः । निश्चलत्वे हेतुः – अनन्तः देशकालवस्तुपरिच्छेदशून्यः, शुद्धः अशुद्धरहितः, पुनरजरः जरारहितः, अमरो मरणरहितश्च । सर्वधर्माणां देहत्रयवर्तित्वादिति भावः ॥२८॥

स्वदेहे शोभनं सन्तं पुरुषाख्यं च सम्मतम्
किं मूर्ख ! शून्यमात्मानं देहातीतं करोषि भोः ॥ २९

ननु – आत्मा प्रत्यक्षदेहरूपो न भवति तर्हि शून्यत्वमात्मनः स्यादित्याशङ्ख्याह – स्वदेह इति । भो मूर्ख ! स्वदेहे पुरुषाख्यं पुरि मनुष्यशरीरे उषति अहमाकारेण वसतीति पुरुष इत्याख्या नाम यस्य तम् । अत एव शोभनं मङ्गलं शरीरविलक्षणत्वादतिमङ्गलं तथा सम्मतम् । "अयमात्मा ब्रह्म" इत्यादिवाक्यनिर्णीतं चकारात् "उत्तमः पुरुषस्त्वन्यः" इत्यादिस्मृतिनिर्णीतं घटद्रष्टृवद्देहद्रष्टृत्वेन देहातीतमात्मानं सततं भावं सन्तं सर्वव्यवहाराधिष्ठानं, शून्यं खपुष्पादिवत् अत्यन्ताभावरूपं किं करोषि कथं मन्यसे ? मा मन्यथा इति भावः । क्वचित् "स्वदेहम्" इति द्वितीयान्तः पाठस्तस्मिन् पक्षे देहात्मवाद्येव वदति । उक्तलक्षणं मनुष्यदेहं त्यक्त्वा, समानमन्यत् ॥२९॥

स्वात्मानं शृणु मूर्ख ! त्वं श्रुत्या युक्त्या च पूरुषम्
देहातीतं सदाकारं सुदुर्दर्शं भवादृशैः ३०

ननु – शुन्यवादिन एवाभावापत्तेः शून्यं मास्तु, परन्त्वात्मनो देहातीतत्वे प्रमाणाभावादेह एवात्मा स्यादित्याशङ्ख्याह – स्वात्मानमिति । भो मूर्ख ! देहात्मवादिन् चार्वाक ! त्वं स्वात्मानं स्वकीयमात्मानं पुरुषं देहातीतं देहातिरिक्तं श्रुत्या "तस्माद्वा एतस्मादन्नरसमयादन्योन्तर आत्मा" इत्यादिकया, पुनर्युक्त्या च "एकस्मिन्कर्तृकर्मविरोघ" इत्यादिरूपया शृणु अवधारय । देहातीतत्वे किमाकार आत्मेत्यत आह – सदाकारमिति । सदाकारमस्तीत्येतन्मात्रव्यवकारकारणभूत आकारो यस्य तम् । एवंविधोऽस्ति चेत् कुतो न दृश्यत इत्यत आह – सुदुर्दर्शमिति । भवादृशैः श्रुत्याचार्यश्रद्दाशून्यैः सुदुर्दर्शं सर्वथा दर्शनायोग्यं, तस्यादृष्टरूपत्वादेवेत्यर्थः । यद्वा पूर्वश्लोकोक्तद्वितीयापेक्षया देहात्मवादिनः समाधानार्थोऽयं श्लोकः स्वात्मानमिति ॥३०॥

अहंशब्देन विख्यात एक एव स्थितः परः
स्थूलस्त्वनेकतां प्राप्तः कथं स्याद्देहकः पुमान् ३१

तदेवाह – अहमेइत्यादिसप्तभिः । परः देहादन्य आत्मा अहंशब्देन । शब्द एत्युपलक्षणं प्रत्ययस्यापि । विख्यातः प्रसिद्धः । किंलक्षण इत्यत आह – एक इति । एक एव स्थितः । एवेति प्रत्येकमवधारणम् । तुशब्दः पूर्वोक्तादात्मनः स्थूलदेहस्य वैलक्षण्यद्योतकः । स्तूलो देहकः, देह एव देहकः । स्वार्थे कप्रत्ययः । कथं पुमान् पुरुषः आत्मा स्यान्न कथञ्चिदित्यर्थः । देहस्यानात्मत्वे हेतुमाह – अनेकतामिति । अनेकतां परस्परं भिन्नतां प्राप्तः । एवं तमःप्रकाशवदतिविलक्षणत्वेऽपि देहस्यात्मत्वं ब्रुवन्नतिमूढत्वादुपेक्ष्य इति भावः ॥३१॥

> अहं द्रष्टृतया सिद्धो देहो दृश्यतया स्थितः
> ममायमिति निर्देशात् कथं स्याद्देहकः पुमान् ३२

तदेवातिवैलक्षण्यं दर्शयति – अहमिति । अहमहंशब्दप्रत्ययालम्बन आत्मा द्रष्टृतया शब्दादिविषयक्राशकतया सिद्धः – शब्दं शृणोमीत्यादिव्यवहारेण प्रसिद्धः, देहस्तु दृश्यतमा शब्दादिवत् प्रकाश्यतया स्थितः । तत्र हेतुमाह – ममेति । ममायं देह इति घटादिवत् स्वीयसम्बन्धितया निर्देशात् व्यवहारात् । एवमुभयोर्वैलक्षण्ये सति, कथं देहकः पुमान् स्यादिति व्याखातार्थश्चतुर्थपादः । एवमग्रेऽपि बोद्धव्यम् ॥३२॥

> अहं विकारहीनस्तु देहो नित्यं विकारवान्
> इति प्रतीयते साक्षात् कथं स्याद्देहकः पुमान् ३३

पुनर्वैलक्षण्यान्तरमाह – अहमिति । अहं (व्याख्यातार्थः) विकारहीनः जायतेऽस्तीत्यादि-षड्विकारहीनः । तु वैलक्षण्ये । देहो नित्यं सर्वकालं विकारवान् अत्र किं प्रमाणमत आह – इतीति । इति साक्षात् प्रत्यक्षप्रमाणेन प्रतीयते अनुभूयते । एवं सति, कथं स्याद्देहकः पुमानिति ॥३३॥

> यस्मात्परमिति श्रुत्या तया पुरुषलक्षणम्
> विनिर्णीतं विमूढेन कथं स्याद्देहकः पुमान् ३४

एवं युक्त्वा देहात्मनोर्वैलक्षण्यमुक्त्वा श्रुत्याप्याह – यस्मादीत् । "यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो नज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्" तया प्रसिद्धया तैत्तिरीयश्रुत्या । श्रुयेति करणे तृतीया । पुरुषस्यात्मनो लक्षणम् । विमूढेन विगतमूढभावेनातिचतुरेण, श्रुत्यर्थविवेचनकुशलेनेत्यर्थः । इयं कर्त्तरि तृतीया । विनिर्णीतं विचार्य स्थापितम् । अन्यत्पूर्ववत् । तद्वा – श्रुतेति पर्तृपदम् । अस्मिन् पक्षे विमूढेनेति देहात्मवादिनं प्रति सम्बोधनम् । विमूढानां इन स्वामिन् । मूर्खशिरोमणित्वादेव श्रुतिं नाद्रियस इति भावः ॥३४॥

> सर्वं पुरुष एवेति सूक्ते पुरुषसंज्ञिते
> अप्युच्यते यतः श्रुत्या कथं स्याद्देहकः पुमान् ३५

न केवलमनयैकया श्रुत्या निविर्णीतं किन्त्वन्ययापीत्याह – सर्वमिति । यतो हेतोः श्रुत्या वेदाख्यपरदेवतया "पुरुष एवेदं सर्वम्" इति पुरुषसंज्ञिते सूक्तेऽप्युच्यते । पुरुषलक्षणमिति पूर्वश्लोकादध्याहारः । अतः कथं स्यादिति पूर्ववत् ॥३५॥

असङ्गः पुरुषः प्रोक्तो बृहदारण्यकेऽपि च
अनन्तमलसंश्लिष्टः कथं स्याद्देहकः पुमान् ३६

अपरयापि श्रुत्यैवमेव निर्णीतमित्याह – असङ्ग इति । "असङ्गो ह्ययं पुरुषः" इति श्रुत्या बृहदारण्यके वाजसनेयोपनिषदि पुरुष असङ्गः प्रोक्तः । देहकस्त्वनन्तमलसंश्लिष्टः । कथं पुमान् स्यादिति प्राग्वत् ॥३६॥

तत्रैव च समाख्यातः स्वयंज्योतिर्हि पूरुषः
जडः परप्रकाश्योऽसौ कथं स्याद्देहकः पुमान् ३७

तत्रैवान्यप्रकारेणापि देहात्मनोर्वैलक्षण्यं निरूपितमित्याह – तत्रैवेति । तत्रैव बृहदारण्यक एवेत्यर्थः । अत्रायं पुरुषः स्वयंज्योतिर्भवतीति श्रुत्या स्वयंज्योतिः पुरुषः समाख्यातः । हीति विद्वत्प्रसिद्धिं द्योतयति । असौ घटादिवद् दृश्योऽत् एव प्रप्रकाश्यस्तत एव जडो देहकः कथं पुमान् स्यादिति व्याख्यातम् ॥३७॥

प्रोक्तोऽपि कर्मकाण्डेन ह्यात्मा देहाद्विलक्षणः
नित्यश्च तत्फलं भुङ्क्ते देहपातादनन्तारम् ३८

अथास्तामिदं ज्ञानकाण्डं कर्मकाण्डेऽपि देहात्मनोर्भेद एव निर्णीत इत्याह – प्रोक्त इति । हि यस्मात् कर्मकाण्डेनापि "यावज्जीवमग्निहोत्रं जुहुयात्" इत्यादिरूपेण कर्मप्रतिपादकेन वेदभागेनेत्यर्थः । आत्मा देहाद्विलक्षणः प्रोक्तः । कथमित्यत आह – नित्य इति । नित्यत्वं च कुत इत्यत आह – तदिति । देहपातादनन्तरं तत्फलमनित्यं कर्मफलं यत आत्मा भुङ्क्तेऽतो नित्य इत्यर्थः । चकारात् न्यायसाङ्ख्यादवप्येवमेव देहात्मनोर्भेदो वर्णित इति दर्शितम् ॥३८॥

लिङ्गं चानेकसंयुक्तं चलं दृश्यं विकारि च
अव्यापकमसद्रूपं तत्कथं स्यात् पुमानयम् ३९

ननु – एवं सति वेदान्तिनामपसिद्धान्तः स्यादित्यत आह – लिङ्गमिति । लिङ्गं लिङ्गशरीरं तत्परोक्षादिधर्मविशिष्टम्, अयं निर्यापरोक्षस्वभावः पुमान् कथं स्यान्न कथञ्चिदित्यर्थः । चकारात् कारणशरीरमपि निराकृतम् । अनयोरपि भेदे लिङ्गदेहस्य वैलक्षण्यसूचकानि विशेषणान्याह – अनेकेति । अनेकसंयुक्तं देवमनुष्यादिनानास्थूलशरीरसम्बन्धयुक्तम् । यद्वा – श्रोत्रादिबुद्ध्यन्तसप्तदशकलासंयुक्तं तथा चलं चञ्चलं मनःप्रधानत्वादित्यर्थः । पुनर्दृश्यं "ममेदं श्रोत्रं, ममेदं मन" इत्यादिममतास्पदत्वेनात्मन उपसर्जनभूतं च् अपुनर्विकारि उपचयादिमत् । व्यापकं परिच्छिन्नमसद्रूपमात्मज्ञानैकबोध्यं च । अत्रेदमाकूतम् – यद्यपि लिङ्गशरीराधासे नात्मनः कर्तृत्वभोक्तृत्वादिभावस्तथाप्यात्मनः

स्वतस्तदभावाज्ञानाध्यासनिवृतावकर्तृत्वाभोक्तृत्वादिभावसिद्धिरिति वेदान्तिनां न किञ्चिदपसिद्धान्तोऽन्यवदिति मङ्गलम् ॥३९॥

एवं देहद्वयादन्य आत्मा पुरुष ईश्वरः
सर्वात्मा सर्वरूपश्च सर्वातीतोऽहमव्ययः ४०

इदानीं पूर्वोक्तमर्थमुपसंहरति – एवमिति । एवं पूर्वोक्तप्रकारेण देहद्वयात् स्थूलसूक्ष्मलक्षणादन्यो भिन्न आत्मा । कोऽसावित्यत् आह – पुरुष इति । पुरि शेति इति पुरुषः शरीराधिष्ठाता, तर्हि किं जीवः नेत्याह – ईश्वर इति । तत्र हेतुः – सर्वात्मेति । तर्ह्यद्वैतहानिः स्यादित्यत आह – सर्वरूप इति । एवं सति, विकारित्वं स्यदित्यत आह – अहमिति । अहं प्रतक्षोऽहंशब्दप्रत्ययालम्बनत्वेन सर्वदोपलब्धिस्वरूप इत्यर्थः । तर्ह्यहङ्कारः स्यान्नेत्याह – अव्यय इति । अव्ययः अपक्षयादिविकारशून्यः अहङ्कारसाक्षीति भावः ॥४०॥

इत्यात्मदेहभागेन प्रपञ्चस्यैव सत्यता
यथोक्ता तर्कशास्त्रेन ततः किंपुरुषार्थता ४१

अथेदानीमात्मनो देहद्वयातिरिक्तत्वप्रतिपादनमनर्थकमिति शङ्कते – इतीति । इति पूर्वोक्तेप्रकारेण वर्णितेनात्मदेहविभागेन प्रपञ्चस्यैव सत्यता यथोक्ता यथा तर्कशास्त्रेण, ततः प्रपञ्चसत्यत्वप्रतिपादनात् किंपुरुषार्थता कुत्सितपुरुषार्थत्वम् ? भयनिवृत्त्यभावादित्यर्थः । "द्वितीयाद्वै भयं भवति" इति श्रुतेः ।

इत्यात्मदेहभेदेन देहात्मत्वं निवारितम्
इदानीं देहभेदस्य ह्यसत्त्वं स्फुटमुच्यते ४२

भेदज्ञानस्याभेदज्ञानं प्रति कारणत्वादात्मदेहविभागकथनं नानार्थकमित्याह – इतीति । इति पूर्वोक्तेनात्मदेहभेदेनात्मनो देहात् पृथक्करणेन देहस्यैव प्राप्तं चार्वाकमतेनात्मत्वं तन्निवारितम् । इदानीमुत्तरग्रन्थेन तस्य देहभेदस्यासत्त्वमात्मसत्तातिरिक्तसत्ताराहित्यं स्फुटं स्पष्टं यथा स्यात्, तथा हीति प्रसिद्धमुच्यते ॥४२॥

चैतन्यस्यैकरूपत्वाद् भेदो युक्तो न कर्हिचित्
जीवत्वं च मृषा ज्ञेयं रज्जौ सर्पग्रहो यथा ४३

तदेवाह – चैतन्यस्येति । चैतन्यस्य सर्वभूतभौतिकप्रपञ्चाधिष्ठानप्रकाशस्य । "घटः प्रकाशते, पटः प्रकाशते" इत्यादिष्वेकरूपत्वादेकाअकारत्वाद्धेतोः कर्हिचित् कस्याञ्चिदवस्थायामपि भेदो न युक्तो न यथार्थमित्यर्थः । तर्हि जीवभेदः सत्यः स्यादित्यत आह –

जीवत्वमिति । जीवत्वं, चकारोऽप्यर्थः । मृषा मिथ्या ज्ञेयम् । तदुपाधेरेवान्तःकरणादेर्मायामयत्वादित्यर्थः । अधिष्ठानसत्यत्वेन कल्पितस्य मिथ्यात्वबोधे दृष्टान्तमाह – रज्जाविति । यथा रज्जौ तदज्ञानात् वक्रतादिसादृश्येन मन्दाधकारे सर्पग्रहः सर्पबुद्धिअव्युत्पन्नस्य भवति, न तु व्युत्पन्नस्य, तथैवात्मन्यात्माज्ञानात् प्रकाशसादृश्यादविशेषप्रकाशे चिज्जडग्रन्थिरूपचिदाभासभ्रमो भवत्यविवेकिनां, न तु विवेकिनामिति वेदान्तसिद्धान्तरहस्यम् ॥४३॥

> रज्ज्वज्ञानात् क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी
> भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला ४४

इदानीं पूर्वोक्तमेव दृष्टान्तं विवृण्वन् सर्वस्यापि प्रपञ्चस्य ब्रह्मरूपतामाह – रज्ज्विति । केवलेतिविशेषणेन पूर्वावस्थामपरित्यज्यावस्थान्तरप्राप्तिलक्षणविवर्तोपादानत्वमेवोक्तं, नारम्भोपादानत्वं, नापि परिणामोपादानत्वमिति बोध्यम् । अन्यत् स्पष्टम् ॥४४॥

> उपादानं प्रपञ्चस्य प्रह्मणोऽन्यन्न विद्यते
> तस्मात् सर्वप्रपञ्चोऽयं ब्रह्मैवास्ति न चेतरत् ४५

अत्र हेतुं दर्शयन् पूर्वोक्तमुपसंहरति – उपादानमिति । यस्मात्प्रपञ्चस्याकाशादिदेहान्तस्य जगद्विस्तारस्य ब्रह्मणो मायाशबलाच्चैतन्यादन्यत् परमाणवो, यद्वा प्रकृतिरुपादानकारणविशेषो न विद्यते, "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यादिश्रुतेः । तस्माद्धेतोरिति । स्पष्टमन्यत् ॥४५॥

> व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात्
> इति ज्ञाते परे तत्त्वे भेदस्यावसरः कृतः ४६

ननु – व्याप्यव्यापकतारूपे भेदे जाग्रति सति, कथं प्रपञ्चस्य ब्रह्मतेत्याशङ्क्याह – व्याप्तेति । व्याप्यमान्तरं व्यापकं बाह्यं तयोर्भावस्तत्ता । मिथ्या घटाकाशादिवत् कल्पितत्वादसन्नित्यर्थः । तत्र प्रमाणमाह – सर्वमिति । "इदं ब्रह्मेदं क्षत्रमिति प्रकृत्यिदं सर्वं यदयमात्मा" इत्यादिश्रुतिरूपेश्वराज्ञाबलादित्यर्थः । ततः किमत आह – इतीति । इति ज्ञाते इत्यादि सुगमम् ॥४६॥

> श्रुत्या निवारितं नूनं नानात्वं स्वमुखेन हि
> कथं भासो भवेदन्यः स्थिते चाद्वयकारणे ४७

ननु – प्रतक्षेण भासमानो व्याप्यव्यापकभावः कथं मिथ्येत्याशङ्ख्याह – श्रुत्येति । नूनमिति निश्चये । हीति प्रसिद्धौ । श्रुत्या "नेह नानाऽस्ति किञ्चन" इत्यादिरूपयेत्यर्थः । नानात्वं निवारितम् । तेन च नानात्वनिवारणेनाद्वयकारणेऽभिन्ननिमित्तोपादाने ब्रह्मणि स्थिते सति, भासो

व्याप्यव्यापकादिप्रतिभासः, कार्यभूतोऽन्यः स्वकारणातिरिक्तः कथं भवेन्न कथञ्चिदित्यर्थः ॥४७॥

दोषोऽपि विहितः श्रुत्या मृत्योर्मृत्युं स गच्छति इह पश्यति नानात्वं मायया वञ्चितो नरः	४८

किञ्च, भेददृष्टेदोषश्रवणादपि कारणादभिन्नमेव कार्यमित्याह – दोष इति । "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यादिरूपया श्रुत्येत्यर्थः । तत्र मृत्योरनन्तरं मृत्युं जननमरणपरम्परामित्यर्थः । स्पष्टमन्यत् ॥४८॥

ब्रह्मणः सर्वभूतानि जायन्ते परमात्मनः तस्मादेतानि ब्रह्मैव भवन्तीत्यवधारयेत्	४९

तर्हि किं कुर्यादित्यत आह – ब्रह्मण इति । बृहत्त्वादपरिच्छिन्नत्वाद् ब्रह्म । तद्रूपात्परमात्मनः सर्वाणि भूतानि जायन्त उत्पद्यन्ते । जायन्त इति स्थितिप्रलययोरप्युपलक्षणं, "यतो वा इमानि भूतानि जायन्ते" इत्यादि श्रुतेः । यस्मादेवं तस्माद्धेतोरेतानि भूतानि ब्रह्मैव भवन्ति सन्मात्रब्रह्मरूपाणीत्यवधारयेन्निश्चिनुयादिति ॥४९॥

ब्रह्मैव सर्वनामानि रूपाणि विविधानि च कर्माण्यपि समग्राणि बिभर्तीति श्रुतिर्जगौ	५०

ननु – नानानामरूपकर्मभेदेन विचित्राणि भूतानि कथं ब्रह्मात्मकानीत्याशङ्क्याह – ब्रह्मैवेति । "त्रयं वा इदं नाम रूपं कर्म" इति बृहदारण्यकश्रुतिर्जगौ गायनं कृतवती, स्वाधिकारिणः श्रावयामासेत्यर्थः । किमित्यत आह – ब्रह्मैव सर्वनामान्याकाशादिदेहान्तान् संज्ञाविशेषान्, च पुनर्विविधानि रूपाण्यवकाशादिद्विपदान्तान् नानाविकारविशेषान् । अपिशब्दश्चार्थे । रूपग्रहणं गन्धादिग्रहणस्याप्युपलक्षणम् । समग्राणि कर्माणि आकाशप्रदानादीनि स्नानशौचादीन् क्रियाविशेषानपि बिभर्ति । रज्ज्वादिकमिव सर्पादिप्रतिभासं दधात्यधिष्ठानदर्शनशून्यान् प्रति दर्शयतीत्यर्थः ॥५०॥

सुवर्णाजायमानस्य सुवर्णत्वं च शाश्वतम् ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत्	५१

अत्र लोकप्रसिद्धं दृष्टान्तमाह – सुवर्णेति । सुगमम् ॥५१॥

स्वल्पमप्यन्तरं कृत्वा जीवात्मपरमात्मनोः
यः सन् तिष्ठति मूढात्मा भयं तस्याभिभाषितम् ५२

एवं कर्तृकर्मादिकारकघटस्यैकाधिष्ठानरूपत्वे सिद्धेऽपि भेददर्शिनो भयमाह – स्वल्पेति । स्वल्पमप्यन्तरमुपास्योपासकरूपं भेदं कृत्वा कल्पयित्वा यस्तिष्ठति, तस्य भयं भाषितम् । "यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति" इत्यादिश्रुत्येत्यर्थः ॥५२॥

यत्राज्ञानाद्भवेद् द्वैतमितरस्तत्र पश्यति
आत्मत्वेन यदा सर्वं नेतरस्तत्र चाण्वपि ५३

ननु – प्रकाशतमसोरिव परस्परविरुद्धस्वभावयोर्द्वैताद्वैतयोः कुत एवाधिकरणत्वम् इत्याशङ्क्यावस्थाभेदादित्याह – यत्रेति । यत्र यस्यामज्ञानावस्थायाम् अज्ञानेन द्वैतमिव भवेत्, तत्र तस्यामज्ञानावस्थायाम् "इतरोऽन्योऽन्यत् पश्यति यत्र हि द्वैतमिव भवति, तदितर इतरं पश्यति, तदितर इतरं जिघ्रति, तदितर इतरं शृणोति, तदितर इतरमभिवदति, तदितर इतरं मनुते, तदितर इतरं विजानातीति । यत्र वाऽन्यदिव स्यात्, तत्रान्योऽन्यत् पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेत्" इत्यादिश्रुतेः । चशब्दः पूर्वोक्ताद्वैलक्षण्यं सूचयति । यदा यस्मिन् ज्ञानकाले सर्वमात्मत्वेन भवेत्, तत्र तस्मिन् ज्ञानकाले इतरोऽण्वपि किञ्चिदप्यन्यन्न पश्यति । "यत्र वा, अस्य सर्वमात्मैवाभूत्, तत्केन कं पश्येत्, तत्केन कं जिघ्रेत्" इत्यादिश्रुतेः सकार्याज्ञाननिवृत्त्या न द्वैतमिति भावः ॥५३॥

यस्मिन् सर्वाणि भूतानि ह्यात्मत्वेन विजानतः
न वै तस्य भवेन्मोहो न च शोकोऽद्वितीयतः ५४

ननु – द्वैतादर्शने कः पुरुषार्थ इत्याशङ्क्य तत्प्रतिपादिकाम् "यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इति श्रुतिमर्थतः पठति – यस्मिन्निति । यस्मिन्नवस्थाविशेषे सर्वाणि भूतान्यात्मत्वेनात्मभावेन विजानतः अपरोक्षेण साक्षात्कुर्वतोऽधिकारिणः पुरुषस्य । तस्येति षष्ठी सप्तम्यर्थे । तस्मिन्नवस्थाविशेषे वै निश्चयेन मोहो भ्रमो न भवेत्, च पुनः शोको व्याकुलताऽपि न भवेत् । उभयत्र हेतुः – अद्वितीयतः तत्कारणाभावादित्यर्थः ॥५४॥

अयमात्मा हि ब्रह्मैव सर्वात्मकतया स्थितः
इति निर्धारितं श्रुत्या बृहदारण्यसंस्थया ५५

शोककारणद्वैताभावे प्रमाणमाह – अयमिति । "स वा अयमात्मा ब्रह्म विज्ञानमयः" इत्यादिरूपयेत्यर्थः । शेषं स्पष्टम् ॥५५॥

अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सन्
असद्रूपो यथा स्वप्न उत्तरक्षणबाधतः ५६

ननु – अयं लोक एव तत्कारणे सति, कथं शोकाद्यभाव उच्यते इत्याशङ्क्य सदृष्टान्तमाह – अनुभूत इति। शेषं स्पष्टम् ॥५६॥

स्वप्नो जागरणेऽलीकः स्वप्नेऽपि न हि जागरः
द्वयमेव लये नास्ति लयोऽपि ह्युभयोर्न च ५७

दृष्टान्तं विवृण्वन्नुक्तन्यासमन्यत्राप्यतिदिशति – स्वप्न इति । अलीको मिथ्या द्वयं स्वप्नजागरणे। लये सुषुप्तौ। शेषं स्पष्टम् ॥५७॥

त्रयमेव भवेन्मिथ्या गुणत्रयविनिर्मितम्
अस्य द्रष्टा गुणातीतो नित्यो ह्येकश्चिदात्मकः ५८

उक्तमुपसंहरन् फलितमाह – त्रयमिति । त्रयं जाग्रदाद्यवस्थात्रयमेवमुक्तपरस्परव्यभिचारेण मिथ्या। मिथ्यात्वे हेतुः – गुणेति। गुणत्रयविनिर्मितं मायाकल्पितमित्यर्थः। तर्हि किं सत्यमत आह – अस्येति। अस्य अवस्थात्रयस्य। शेषं स्पष्टम् ॥५८॥

यद्वन्मृदि घटभ्रान्तिं शुक्तौ वा रजतस्थितिम्
तद्वद् ब्रह्मणि जीवत्वं वीक्ष्यमाणे न पश्यति ५९

ननु – अवस्थात्रयं मिथ्या भवतु, जीवस्तु सत्यः स्यादित्याशङ्क्य सदृष्टान्तमुत्तरमाह – यद्वदिति । ब्रह्मणि वीक्ष्यमाणे आत्मत्वेन साक्षात्कृते सति जीवत्वं न पश्यतीत्यन्वयः । अन्यत् स्पष्टमेव ॥४९॥

यथा मृदि घटो नाम कनके कुण्डलाभिधा
शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथ परे ६०

अज्ञानावस्थायां प्रतीयमानो यो जीवब्रह्मभेदः स नाममात्र इति बहुदृष्टान्तैराह – यथेति । रजतस्य ख्यातिराख्या, नामेति यावत्। परे परब्रह्मणि जीवशब्दस्तथा। शेषं स्पष्टम् ॥६०॥

> यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले
> पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ६१

न केवलं जीव एव नाममात्रः, किन्तु सर्वं विश्वमपि ब्रह्मणि नाममात्रमित्यनेकदृष्टान्तैराह – यथैवेति। स्पष्टम्॥६१॥

> यथैव शून्ये वैतालो गन्धर्वाणां पुरं यथा
> यथाऽऽकाशे द्विचन्द्रत्वं तद्वत् सत्ये जगत्स्थितिः ६२

नाममात्रप्रपञ्चस्य मिथ्यात्ववासनादार्ढ्यायेममेवार्थं बहुभिर्लोकप्रसिद्धदृष्टान्तैः प्रपञ्चयति – यथैव शून्य इत्यादित्रिभिः । शून्ये निर्जने देशे वैतालः अकस्मादाभासमानो भूतविशेषः । गन्धर्वपुरस्यापि शून्याधिष्ठानत्वं ज्ञेयम् । गन्धर्वनगरं नाम राजनगराकारो नीलपीतादिमेघरचनाविशेषः। आकाशे द्विचन्द्रत्वम्। स्पष्टमन्यत्॥६२॥

> यथा तरङ्गकल्लोलैर्जलमेव स्फुरत्यलम्
> पात्ररूपेण ताम्रं हि ब्रह्माण्डौघैस्तथाऽऽत्मना ६३

यथा तरङ्गेति सुगमम्॥६३॥

> घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः
> जगन्नाम्ना चिदाभाति ज्ञेयं तत्तदभावतः ६४

किञ्च घटेति। तत्र पादत्रयं स्पष्टम्। ननु – किमनेन मिथ्यात्ववासनादार्ढ्येनेत्यत आह – ज्ञेयमिति । तदभावतो नामाभावतस्तद्ब्रह्म ज्ञेयम् । "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादिश्रुतेः॥६४॥

> सर्वोऽपि व्यवहारस्तु ब्रह्मणा क्रियते जनैः
> अज्ञानान्न विजानन्ति मृदेव हि घटादिकम् ६५

ननु – "यत्र हि द्वैतमिव भवति" इत्यादिश्रुत्यर्थदर्शनेनावस्थात्रये विदेहमोक्षावौक्तौ, न तु जीवन्मोक्ष इत्याशङ्क्याह – सर्व इति। सर्वोऽपि लौकिको वैदिकश्चेति। शेषं स्पष्टम्। अयं भावः – अज्ञाननिवृत्तिरेव जीवन्मुक्तिः, न तु द्वैतादर्शनमिति॥६५॥

कार्यकारणता नित्यमास्ते घटमृदोर्यथा तथैव श्रुतियुक्तिभ्यां प्रपञ्चब्रह्मणोरिह ६६

तत्र हेतुं सदृष्टान्तमाह – कार्येति । यथा "सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्" इत्यादिश्रुतिः । युक्तिस्तु कार्यकारणयोरन्यत्वे एककारणज्ञानात् सर्वकार्यज्ञानं न स्यादित्यादि । सुगममन्यत् ॥६६॥

गृह्यमाणे घटे यद्वन्मृत्तिका भाति वै बलात् वीक्ष्यमाणे प्रपञ्चेऽपि ब्रह्मैवाभाति भासुरम् ६७

कार्यकारणयोरनन्यत्वमेव दृष्टान्तेन स्पष्टयति – गृह्यमाण इति । भासुरं प्रमाणनिरपेक्षतयैव भासनशीलम् । स्पष्टमन्यत् ॥६७॥

सदैवात्मा विशुद्धोऽस्ति ह्यशुद्धो भाति वै सदा यथैव द्विविधा रज्जुर्ज्ञानिनोऽज्ञानिनोऽनिशम् ६८

ननु – ब्रह्मणि भासमाने प्रपञ्चे न भासेतेत्याशङ्क्यावस्थाभेदेनोभयमपि भासत इति सदृष्टान्तमाह – सदैवेति । तत्र ज्ञानिनः सदैवात्मा विशुद्धः, अज्ञानतत्कार्यप्रपञ्चमलरहितत्वान्निष्प्रपञ्चोऽस्तीत्यर्थः । अज्ञानिनस्तु सदैवाशुद्धोऽस्तीति भ्रमाद्विभाति । वै हीति तत्प्रसिद्धौ । उभयत्रापि दृष्टान्तः – यथेति । यथा रज्जुर्ज्ञानिनः सर्पाभावतया निर्विषत्वेनाभयङ्करी । अज्ञानिनस्तु सर्परूपतया विपरीतत्वेन भयङ्करीति द्विविधा भाति । अयं भावः – ब्रह्म यद्यपि स्वयंप्रकाशत्वेन सदा भात्येव, तथापि वृत्यारूढत्वेन पुरुषार्थोपयोगीति ज्ञानिनः प्रतिभाति नाज्ञानिनः, सूर्यदीपादिरिव चक्षुष्मदन्धयोरिति दिक् ॥६८॥

यथैव मृन्मयः कुम्भस्तद्वद्देहोऽपि चिन्मयः आत्मानात्मविभागोऽयं मुधैव क्रियतेऽबुधैः ६९

ननु – आत्मा यदि सदैव निष्प्रपञ्चत्वेन भाति, तर्हि किमर्थं देहात्मभेदो वर्णित इत्याशङ्क्याविवेकिनो देहव्यतिरिक्तात्मबोधार्थः विवेकिनस्तु व्यर्थ एवेति सदृष्टान्तमाह – यथेति । तत्राबुधैरित्यकारप्रश्लेषे मुधैव क्रियते, अपितु नेति काकुव्याख्यानम् । अन्यत् सर्वं सुगमम् ॥६९॥

सर्पत्वेन यथा रज्जू रजतत्वेन शुक्तिका विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ७०

इदानीमविवेकिनः कल्पितदेहतादात्म्यं सदृष्टान्तमाह – सर्पत्वेनेति ॥७०॥

घटत्वेन यथा पृथ्वी पटत्वेनेव तन्तवः
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ७१

घटत्वेनेति। स्पष्टम्॥७१॥

कनकं कुण्डलत्वेन तरङ्गत्वेन वै जलम्
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ७२

कनकमिति॥७२॥

पुरुषत्वे यथा स्थाणुर्जलत्वेन मरीचिका
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ७३

पुरुषत्व इति॥७३॥

गृहत्वेनेव काष्ठानि खड्गत्वेनेव लोहता
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ७४

गृहत्वेनेति। सर्पत्वेनेत्यादिपञ्चानामप्येतेषां श्लोकानामर्थः स्फुटतर एवास्त्यतो न व्याख्यानं कृतम्॥७४॥

यथा वृक्षविपर्यासो जलाद्भवति कस्यचित्
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ७५

ननु – अन्यथानिर्णये किं कारणमिति चेत्, तदज्ञानमेवेति सदृष्टान्तमाह – यथा वृक्षेत्यादिद्वादशभिः॥७५॥

पोतेन गच्छतः पुंसः सर्वं भातीव चञ्चलम्
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ७६

पोतेनेति। पोतेन नौकया। स्पष्टमन्यत्॥७६॥

पीतत्वं हि यथा शुभ्रे दोषाद्भवति कस्यचित्
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ७७

पीतत्वमिति॥७७॥

चक्षुर्भ्यां भ्रमशीलाभ्यां सर्वं भाति भ्रमात्मकम्
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ७८

चक्षुर्भ्यामिति ॥७८॥

अलातं भ्रमणेनैव वर्तुलं भाति सूयवत्
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ७९

अलातमिति ॥७९॥

महत्त्वे सर्ववस्तूनामणुत्वं ह्यतिदूरतः
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८०

महत्त्व इति । हीति सर्वलोकप्रसिद्धौ ॥८०॥

सूक्ष्मत्वे सर्वभावानां स्थूलत्वं चोपनेत्रतः
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८१

सूक्ष्मत्वे इति ॥८१॥

काचभूमौ जलत्वं वा जलभूमौ हि काचता
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८२

काचभूमाविति ॥८२॥

यद्वदग्नौ मणित्वं हि मणौ वा वह्निता पुमान्
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८३

तद्वदिति ॥८३॥

अभ्रेषु सत्सु धावत्सु सोमो धावति भाति वै
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८४

अभ्रेष्विति ॥८४॥

यथैव दिग्विपर्यासो मोहाद्भवति कस्यचित्
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८५

यथेति । यथा वृक्षेत्यादिश्लोकानां स्फुटार्थत्वात् पिष्टपेषणतुल्यत्वेन न व्याख्यानं कृतम् ॥८५॥

यथा शशी जले भाति चञ्चलत्वेन कस्यचित्
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८६

यथा शशीति । शशीत्युपलक्षणं सूर्यादीनामपि । शेषं स्पष्टम् ॥८६॥

एवमात्मन्यविद्यातो देहाध्यासो हि जायते
स एवात्मपरिज्ञानाल्लीयते च परात्मनि ८७

एवं द्वादशभिः श्लोकैरुक्तमर्थमुपसंहरति – एवमिति । एवमुक्तेन प्रकारेणात्मन्यविद्यातः आत्माज्ञानात् देहाध्यासो मनुष्योऽहमित्यादिबुद्धिर्जायते भवति । हीति प्रसिद्धौ । ननु – एतस्य निवृत्तिः कुतो भवेदिति चेदात्मज्ञानादेवेत्याहोत्तरार्धेन – स इति । स एव देहाध्यास एवात्मपरिज्ञानात् ब्रह्मात्मैक्यसाक्षात्कारात् परात्मनि अज्ञानतत्कार्यरहिते प्रत्यगभिन्ने ब्रह्मणि लीयते ब्रह्मस्वरूपेणावतिष्ठते । नह्यधिष्ठानं विनाऽऽरोपितस्य स्वरूपमस्ति । चकारादध्यासकारणमज्ञानमपि लीयत इति । अन्यथाऽध्यासलयाभावादित्यर्थः । न हि कारणे सति, कार्यस्य लयः सम्भवति । तस्मादात्मज्ञानादेव सकारणकार्याध्यासनिवृत्तिरियलं पल्लवितेन ॥८७॥

सर्वमात्मतया ज्ञातं जगत्स्थावरजङ्गमम्
अभावात् सर्वभावानां देहस्य चात्मता कुतः ८८

एतदेव विवृणोति – सर्वमिति । आत्मता देहस्य नेत्यर्थः । स्पष्टमन्यत् ॥८८॥

आत्मानं सततं जानन् कालं नय महाद्युते
प्रारब्धमखिलं भुञ्चन्नोद्वेगं कर्तुमर्हसि ८९

ननु – ज्ञानिनो निष्प्रपञ्चात्मतया मम किं स्यात् ब्रह्मण्यभोजनेनान्यस्तृप्यतीति चेदत आह – आत्मानमिति । भो महाद्युते ! कामादिपराभवेन स्वहितसाधनोन्मुखस्त्वम् आत्मानं प्रत्यगभिन्नं सततम् आसुप्तिमृतिपर्यन्तं जानन् वेदान्तवाक्यैर्विचार्यन् कालं नय अतिक्रामस्व । विचारसाध्यज्ञानानन्तरं चाखिलं प्रारब्धं चरमदेहारम्भकं कर्म भुञ्जन् सुखदुःखाभासानुभवेन क्षपयन् समुद्वेगं कर्तुं नार्हसीत्युपदेशः ॥८९॥

उत्पन्नेऽप्यात्मविज्ञाने प्रारब्धं नैव मुञ्चति
इति यच्छ्रूयते शास्त्रे तन्निराक्रियतेऽधुना ९०

वस्तुतस्तु प्रारब्धमेव नास्ति कुतो भोगः, भोगाभावे कुत उद्वेगकारणं, तदभावे च कुतस्तरां तन्निषेधोपदेश इति वेदान्तसिद्धान्तरहस्यं वक्तुं प्रतिजानत आच्यारा: – उत्पन्न इति । अत्रेयं प्रक्रिया जगत्प्रतीतिस्त्रिधा – शास्त्रीया, लौकिकी, आनुभाविकी चेति । तत्राद्या पारमार्थिकी, द्वितीयाऽपारमाथिकी, तृतीया तु प्रातिभासिकी । तासां निवृत्तिस्तु क्रमात् वेदान्तश्रवणादित्रयसाक्षात्कारप्रारब्धक्षयैर्भवति नान्यथेति । तत्रेयं प्रतिज्ञाऽन्यप्रतीत्यभिप्रायेणेति ज्ञातव्यम् । श्लोकार्थस्तु स्फुट एव ॥९०॥

तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते
देहादीनामसत्यत्वाद्यथा स्वप्नो विबोधतः ९१

तदेवाह – तत्त्वेति । ज्ञानेन सर्वव्यवहारकारणाज्ञाननिवृत्तौ प्रारब्धाभाव इति श्लोकार्थः । पदार्थस्तु स्फुट एव ॥९१॥

कर्म जन्मान्तरीयं यत् प्रारब्धमिति कीर्तितम्
तत्तु जन्मान्तराभावात् पंसो नैवास्ति कर्हिचित् ९२

इदानीं प्रारब्धशब्दं व्युत्पादयन्नुक्तमुपसंहरति – कर्मेति । तत्र कर्म त्रिविधं – सञ्चितक्रियमाणप्रारब्धभेदात् । तन्मध्ये भाविदेहारम्भकं सञ्चितं, तथा जन्मान्तरीयमेव तथापि भाविदेहस्य तत्प्रारब्धेम्व भवति । तेनेदं सिद्धमात्मनः स्वतःकर्तृत्वाभावात् कालत्रयेऽपि जन्म नास्तीति सर्वमवदातम् ॥९२॥

स्वप्नदेहो यथाऽध्यस्तस्तथैवायं हि देहकः
अध्यस्तस्य कुतो जन्म जन्माभावे हि तत्कृतः ९३

पूर्वोक्तं दृष्टान्तं विवृण्वन् सकारणजन्माभावे युक्तिमाह – स्वप्नेति । जन्माभावे तत्प्रारब्धं कुतः । स्पष्टमन्यत् ॥९३॥

उपादानं प्रपञ्चस्य मृद्भाण्डस्येव कथ्यते
अज्ञानं चैव वेदान्तस्तस्मिन्नष्टे क्व विश्वता ९४

ननु – देहादिप्रपञ्चस्य "यतो वा०" इत्यादिश्रुतेः सत्यब्रह्मजन्यत्वात् कथं प्रातिभासिकत्वमिति चेदुच्यते – उपादानमिति । अत्र कारणं द्विविधं – निमित्तोपादानभेदात् । तत्र

निमित्तं नामोत्पत्तिमात्रकारणम् । उपादानं तूत्पत्तिस्थितिलयकारणम् । तत्र वेदान्तैः – "मायां तु प्रकृतिं विद्यात्" इत्यादिभिः प्रपञ्चस्योपादानमज्ञानं पठ्यते, चकाराद् ब्रह्मापि । अत्रायं भावः – न केवलं ब्रह्मैव जगत्कारणं, निर्विकारत्वात् । नापि केवलमज्ञानं, जडत्वात् । तस्मादुभयं मिलित्वैव जगत्कारणं भवतीति । "सत्यानृते मिथुनीकरोति" इत्यादिश्रुतेः । तत्र दृष्टान्तः – भाण्डस्य घटकरकादेर्मृदिव मृत्पिण्डम् इव । जलस्थाने, आवरकत्वसाम्यात् । तत्र ब्रह्मणोऽविनाशित्वाद् ब्रह्माज्ञानेन तस्मिन्नज्ञान एव नष्टे सति, विश्वता जीवजगदीश्वरात्मकजगद्भावः क्व, न क्वाप्यस्तीत्यर्थः ॥९४॥

यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात्
तद्वत् सत्यमविज्ञाय जगत् पश्यति मूढधीः ९५

मिथुनीभावस्यैव जगत्कारणत्वं सदृष्टान्तं प्रपञ्चयति – यथा रज्जुमिति ॥९५॥

रज्जुरूपे परिज्ञाते सर्पभ्रान्तिर्न तिष्ठति
अधिष्ठाने तथा ज्ञाते प्रपञ्चः शून्यतां व्रजेत् ९६

इदानीं यदुक्तं "तस्मिन्नष्टे क्व विश्वता" इति तत् प्रपञ्चयन् पूर्वोक्तं प्रारब्धाभावं सदृष्टान्तमुपसंहरति सार्धेन – रज्जुरूप इति स्पष्टम् ॥९६॥

देहस्यापि प्रपञ्चत्वात् प्रारब्धावस्थितिः कुतः
अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः ९७

किञ्च देहस्येति । जीवन्मुक्तस्य ज्ञानिनः प्रारब्धाभावे सति "अत्र ब्रह्म समश्नुते" इत्यादिश्रुतिः प्रारब्धं किमर्थं वक्तीति चेदुच्यते अर्धेन – अज्ञानीति । श्रुतिः अज्ञानिजनबोधार्थं प्रारब्धं वक्तीत्यन्वयः । ज्ञानेन सर्वव्यवहारकारणे ऽज्ञाने नष्टे सति, ज्ञानिनः कथं व्यवहार इत्यज्ञानिभिराक्षिप्ते प्रारब्धमिति तद्बोधार्थमिति । शेषं स्पष्टम् ॥९७॥

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे
बहुत्वं तन्निषेधार्थं श्रुत्या गीतं च यत्स्फुटम् ९८

किं तर्हि ज्ञानिबोधार्थं वक्ति श्रुतिरिति चेदुच्यते – क्षीयन्त इति । "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति श्रुत्या । कर्माणीति बहुत्वं यत् स्फुटं गीतं तत्तन्निषेधार्थं प्रारब्धाभाव-प्रतिपादनार्थं, अन्यथा सञ्चितक्रियमाणापेक्षया कर्माणीति द्वित्वं गेयम् । तथा न गीतमतो ब्रह्मात्मसाक्षात्कारात् चिज्जडग्रन्थिभेदेन

सञ्चितक्रियमाणप्रारब्धाख्यत्रिविधकर्मक्षयान्ते परमपुरुषार्थं ज्ञानिबोधार्थं श्रुतिर्वक्तीति भवः ॥९८॥

उच्यतेऽज्ञैर्बलाच्चैतत्तदाऽनर्थद्वयागमः वेदान्तमतहानं च यतो ज्ञानमिति श्रुतिः ९९

उक्तवैपरीत्ये बाधकमाह – उच्यत इति । एतत्प्रारब्धमज्ञैः श्रुतितात्पर्यानभिज्ञैर्बलादविवेकसामर्थ्याच्चोच्यते यथार्थतया प्रतिपाद्यते । चकाराददव्यात्मानं न पश्यन्ति । पदाऽनर्थद्वयागमो दोषद्वयप्राप्तिः । तत्र प्रारब्धरूपस्य द्वैतस्याङ्गीकारे अनिर्मोक्षप्रसङ्ग एको दोषः, मोक्षाभावे ज्ञानसंप्रदायोच्छेदरूपो द्वितीयो दोष इति । न केवलं दोषद्वयस्यैव प्राप्तिरपि तु वेदान्तमतहानं च । वेदान्तमतस्याद्वैतस्य हानं त्यागो भविष्यति, प्रारब्धग्रहणरूपस्य द्वैतस्य याथार्थ्यादित्यर्थः । तर्हि किं प्रतिपत्तव्यमित्यत आह – यत इति । यतो यस्याः सकाशात् ज्ञानं तवति, तादृशी सा श्रुतिः । ग्राह्येति शेषः । सा श्रुतिरस्तु – "तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद् बहूञ्छब्दान् वाचो विग्लापनं हि तत्" इति । एतदभिप्रायः क इति चेल्लिख्यते – धीरो विवेकी ब्राह्मणो ब्रह्म भवितुमिच्छुस्तमेव वेदान्तप्रसिद्धमात्मानं विज्ञायऽऽदावुपदेशतह् शास्त्रतश्च ज्ञात्वाऽनन्तरं प्रज्ञां शास्त्राचार्योपदिष्टविषयामपरोक्षानुभवपर्यन्तां जिज्ञासापरिसमाप्तिकरीं कुर्वीत । बहून् कर्मोपासनाप्रतिपादकान् शब्दान् वाक्यसन्दर्भान्नानुध्यायान्न चिन्तयेत् । तर्हि तान् ब्रूयात् किं तेनेत्याह – वाच इति । तदद्वैतशास्त्रपठनं वाचो विग्लापनं विशेषेण श्रमकरम् । हीति सर्वानुभव-सिद्धमित्यलं पल्लवितेन ॥९९॥

त्रिपञ्चाङ्गान्यथो[6] वक्ष्ये पूर्वोक्तस्य हि लब्धये तैश्च सर्वैः सदा कार्यं निदिध्यासनमेव तु १००

तदेवमेतावता ग्रन्थसन्दर्भेण मुख्याधिकारिणो वैराग्यादिसाधनचतुष्टयपूर्वकं वेदान्तवाक्यविचार एव प्रत्यगभिन्नब्रह्मापरोक्षज्ञानद्वारा मुख्यं मोक्षकारणमित्यभिहितम् । इदानीमसकृद्विचार्यापि बुद्धिमान्द्यविषयासक्त्यादि-प्रतिबन्धेनापरोक्षज्ञानं यस्य न जायते, यस्य मन्दाधिकारिणो निर्गुणब्रह्मोपासनमेव मुख्यं साधनमित्यभिप्रेत्य ससाधनं ध्यानयोगं प्रतिजानत आचार्याः – त्रिपञ्चेति । अथोशब्दोऽधिकारेभेदार्थः । क्वचित् "अत" इति पाठस्तस्मिन् पक्षे यतो मन्दाधिकारी विचारं न लभतोऽतो हेतोरित्यर्थः । त्रिपञ्च त्रिगुणितानि पञ्च, पञ्चदशेत्यर्थः । तत्सङ्ख्याकान्यङ्गानि निदिध्यासनाङ्गिसाधनविशेषान् यज्ञसाधकप्रयाजादिवदित्यर्थः । वक्ष्ये वक्ष्यामि । तैर्वक्ष्यमाणैः सर्वैरङ्गैर्निदिध्यासनमेव कार्यं न तु तूष्णीमवस्थानमुचितमित्यर्थः । निदिध्यासनकर्तव्यप्रतिज्ञाप्रयोजनमाह – पूर्वोक्तस्येति । पूर्वोक्तस्य स्वरूपावस्थानलक्षणमोक्षस्य

---

[6] अतो इति भाष्यसंमतपाठान्तरम् ।

सिद्धय इति। हीति वेदान्तप्रसिद्धौ। तुशब्दः पातञ्जल-वैलक्षण्यलक्षणेन मोक्षस्य सिद्धय इति। अनेनाष्टाङ्गप्रतिपादकं पातञ्जलमवैदिकत्वाद् वैशेषिकादिवदनादेयमिति ध्वनितम् ॥१००॥

> नित्याभ्यासादृते प्राप्तिर्न भवेत् सच्चिदात्मनः
> तस्माद् ब्रह्म निदिध्यासेज्जिज्ञासुः श्रेयसे चिरम् १०१

मन्दाधिकार्यन्यत् सर्वं कर्म सगुणोपासनविचाररूपं साधनं च विहाय श्रद्धयाऽऽचार्योक्तप्रकारेण निर्गुणं ब्रह्मैव निदिध्यासेदित्याह – नित्येति। स्पष्टम् ॥१०१॥

> यमो हि नियमस्त्यागो मौनं देशश्च कालता
> आसनं मूलबन्धश्च देहसाम्यं च दृक्स्थितिः १०२
> प्राणसंयमनं चैव प्रत्याहारश्च धारणा
> आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात् १०३

ननु – कानि तान्यङ्गानि यैः सह निदिध्यासनं कर्त्तव्यमित्यपेक्षायां तानि निर्दिशति – यमम् इति द्वाभ्याम्। उतानार्थावुभावपि श्लोकौ ॥१०२-३॥

> सर्वं ब्रह्मेति विज्ञानादिन्द्रियग्रामसंयमः
> यमोऽयमिति संप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः १०४

इदानीमेतेषां प्रत्येकं निर्देशक्रमेण स्वाभिमतानि लक्षणान्याह – सर्वमित्याद्येकविंशत्या। तत्र प्रथमोद्दिष्टं यमं तावद्दर्शयति – सर्वमिति। सर्वमाकाशादिदेहान्तं जगद् ब्रह्म, बाधसामानाधिकरण्यद्वारा स्थाणुपुरुषादिवदित्यर्थः। इति विज्ञानान्निश्चयाद्धेतोरिन्द्रियाणां श्रोत्रादीनामेकादशकरणानां ग्रामः समूहस्तस्य संयमः सम्यक् शब्दादिविषयाणां विनाशित्वसातिशयत्वदुःखदत्वादिदोषदर्शनात् यमो विषयेभ्यो निवारणम् अयं यम इति संप्रोक्तः, न तु केवलमहिंसादिरित्यर्थः। ततश्च किमत आह – अभ्यसनीय इति। अयं मुहुर्मुहुरभ्यसनीय इति ॥१०४॥

> सजातीयप्रवाहश्च विजातीयतिरस्कृतिः
> नियमो हि परानन्दो नियमात् क्रियते बुधैः १०५

एवं यमं लक्षयित्वा नियमं लक्षयति - सजातीयेति। सजातीयं प्रत्यगभिन्नं परं ब्रह्म, तदेकाकारो वृत्तिप्रवाहः सजातीयप्रवाहः। यद्वा – सजातीयानामसङ्गोऽहमविक्रियोऽहमित्यादिप्रत्यगभिन्नब्रह्मप्रत्ययानां प्रवाहः। च पुनः, विजातीयतिरस्कृतिः। विजातीयं ब्रह्मात्मविलक्षणं, जगत्पूर्वसंस्काराज्जायमाना तदाकारा

वृत्तिरित्यर्थः । तस्य तिरस्कृतिर्दोषस्मृत्याऽधिकोपेक्षाऽनादर इत्यर्थः । अयं नियम उक्तः । न तु केवलं शौचादिरित्यर्थः । हीत्युपनिषत्प्रसिद्धौ । ननु – अनयोरुपनिषत्प्रसिद्ध्या कः पुरुषार्थ इति चेदत आह – परमानन्द इति । ततश्च किमत आह – नियमादित्यादि । सुगमम् ॥१०५॥

> त्यागः प्रपञ्चरूपस्य चिदात्मत्वावलोकनात्
> त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः १०६

इदानीं तृतीयं त्यागं लक्षयति – त्याग इति । प्रपञ्चरूपस्य प्रपञ्चो नामरूपलक्षणः । रूप्यते घटोऽयं पटोऽयमित्यादि नामरूपतो निरूप्यते व्यवह्रियते प्रकाश्यते, येन तत्प्रपञ्चरूपं सर्वाधिष्ठानभूतं पदार्थस्फुरणं, तस्य । चिदात्मत्वावलोकनाचिदजडं स्वत एव प्रकाशमानं ब्रह्म, तदात्मस्वरूपं यस्य तद्भावस्तस्यावलोकनमनुसन्धानं तस्माद्धेतोर्यस्त्यागः नामरूपोपेक्षा, स एव त्यागस्त्यागशब्दवाच्यः, "ईशावास्यमिदं सर्वं" (ई०उ०) इत्यादिश्रुतेः । हीति विद्वदनुभवप्रसिद्धौ । ननु – अयं त्यागो न कुत्रापि प्रसिद्ध इत्याशङ्क्याह – महतां पूज्य इति । तत्र हेतुः – सद्य इति । यतोऽयं त्यागः सद्योऽनुसन्धानकाल एव मोक्षमयः परमानन्दस्वरूपावस्थानरूपः, अत एवात्मतत्त्वविदामिष्टत्वादति-प्रसिद्धोऽयं त्याग इत्यर्थः । तस्मादयमेव मुमुक्षुणा कर्त्तव्यो नान्यः । केवलस्वकर्माद्यकरणरूप इति भावः । एवमग्रेऽप्यूह्यम् ॥१०६॥

> यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह
> यन्मौनं योगिभिर्गम्यं यद्भवेत् सर्वदा बुधः १०७

अथ मौनं लक्षयति – यस्मादिति । शब्दप्रवृत्तिनिमितजातिक्रियादेरभावात् मनोवाचामगोचरं यन्मौनं वक्तुमशक्यं यत्ब्रह्म तथापि योगिभिर्गम्यं ज्ञानयोगिभिः प्रत्यगभिन्नत्वेन प्राप्यं, तत्प्रसिद्धमेव ब्रह्मरूपं मौनं सर्वदा बुधो विवेकी भवेत् तदहमस्मीत्यनुसन्दध्यादित्यर्थः ॥१०७॥

> वाचो यस्मान्निवर्तन्ते तद्वक्तुं केन शक्यते
> प्रपञ्चो यदि वक्तव्यः सोऽपि शब्दविवर्जितः १०८

ननु – इदं प्रत्यगभिन्नब्रह्मानुसन्धानं ध्यानरूपं चदुर्दशमङ्गं प्रतीयते इत्याशङ्क्य, स्वारस्यात् प्रकरान्तरेण मौनमेव लक्षयति सार्धेन वाच इति । अयं भावः – शब्दप्रवृत्तिनिमित्ताभावाद् ब्रह्म यथा वागविषयं, तथा नामरूपजात्यादिप्रपञ्चोऽपि सदसदादिविकल्पासहताद्वागतीतः ॥१०८॥

इति वा तद्भवेन्मौनं सतां सहजसंज्ञितम्
गिरा मौनं तु बालानां प्रयुक्तं ब्रह्मवादिभिः १०९

इतीति। इत्युक्तप्रकारेण ब्रह्मजगतोर्विवादत्यागरूपं वा तन्मौनं भवेत्। केषामित्याकाङ्क्षायां सतां चेदं प्रसिद्धमित्याह – सतामिति। सत्पुरुषाणां सहजस्थितिनाम्ना प्रसिद्धमित्यर्थः। ननु – वाङ्नियमनमेव प्रसिद्धं मौनमिति चेदाह अर्द्धेन – गिरेति ॥१०९॥

आदावन्ते च मध्ये च जनो यस्मिन्न विद्यते
येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ११०

इदानीं देशं लक्षयति – आदाविति। अत्र जनस्य त्रैकालिकाभाव आनुभविकः स्वप्रतीत्या ज्ञेयः, न तु लौकिकशास्त्रीयप्रतीतिभ्याम्। विरोधादिति भावः। स्पष्टमन्यत् ॥११०॥

कलनात् सर्वभूतानां ब्रह्मादीनां निमेषतः
कालशब्देन निर्दिष्टो ह्यखण्डानन्द अद्वयः १११

अथ कालं लक्षयति – कलनादिति। निमेषत आरभ्य कलनात् सर्गस्थितिप्रलयाधारत्वादित्यर्थः। शेषः स्पष्टम् ॥१११॥

सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिन्तनम्
आसनं तद्विजानीयान्नेतरत् सुखनाशनम् ११२

आसनं लक्ष्यति – सुखेनैवेति। यस्मिन् सुखे सुखरूपे ब्रह्मणि चिन्तनं कर्तव्याकर्त्तव्यचिन्ता नैव भवेत्, तद्ब्रह्मासनं विजानीयादित्यन्वयः। कीदृशं ब्रह्म ? अजस्रं कालत्रयावस्थायीत्यर्थः। सुगममन्यत् ॥११२॥

सिद्धं यत् सर्वभूतादि विश्वाधिष्ठानमव्ययम्
यस्मिन् सिद्धाः समाविष्टास्तद्वै सिद्धासनं विदुः ११३

प्रसङ्गादासनविशेषं लक्षयति – सिद्धमिति। सिद्धं च तदासनं च। अथवा सिद्धानामासनं सिद्धासनमिति। कर्मधारयतत्पुरुषसमासाभ्यां ब्रह्मैवेत्यर्थः ॥११३॥

यन्मूलं सर्वभूतानां यन्मूलं चित्तबन्धनम् मूलबन्धः सदा सेव्यो योग्योऽसौ राजयोगिनाम् ११४

अथ मूलबन्धं लक्षयति – यन्मूलमिति । आकाशादिसर्वभूतानां यन्मूलादिकारणं ब्रहमा, तथा चित्तबन्धनं चित्तस्य बन्धकारणं मूलाज्ञानं, तदपि यन्मूलं यदाश्रयं पृथक्सत्ताशून्यत्वादिति । यद्वा – चित्तस्य बन्धनमेकत्र लक्ष्ये निग्रहस्तादपि (?) यन्मूलं, यस्य ब्रह्मणः प्राप्तिनिमित्तमित्यर्थः । स मूलबन्ध इत्यन्वयः । राजयोगिनां व्यवहारे ऽप्यविक्षिप्तचित्ततालक्षणो राजयोगस्तद्वतां ज्ञानपरिपाकयुक्तानामित्यर्थः । शेषं स्पष्टम् ॥११४॥

अङ्गानां समतां विद्यात् समे ब्रह्मणि लीयते नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ११५

इदानीं देहसाम्यं लक्ष्यति – अङ्गानामिति । अङ्गानां ब्रह्मण्यध्यस्तानां स्वभावविषमाणामधिष्ठानसमत्वदृष्ट्या समतां विद्याज्जानीयात् चेत् समे ब्रह्मणि । अङ्गवैषम्यमित्यत्राध्याहारः । तच्चेन्नो लीयते समब्रह्मरूपतया न तिष्ठतीत्यर्थः । तर्हीत्यत्र शेषः । शुष्कवृक्षवदङ्गानामृजुत्वं सरलत्वमचञ्चलत्वं च यत्तत्समानत्वं नैव भवेदिति सम्बन्धः । अङ्गानां विषमस्वभावत्वादिति भावः ॥११५॥

दृष्टिं ज्ञानमयीं कृत्वा पश्येद् ब्रह्ममयं जगत् सा दृष्टिः परमोदारा न नासाग्रवलोकिनी ११६

इदानीं दृक्स्थितिं लक्षयति – दृष्टिमिति । ब्रह्मणि फलव्याप्यत्वाभावेऽपि वृत्तिव्याप्यत्वात् द्रिष्टिमन्तःकरणवृत्तिं घ्यानमयीमखण्डब्रह्माकारां कृत्वा, जगत्सर्वं ब्रह्ममयं पशेत् । "ब्रह्मैवेदं सर्वम्" इत्येतावन्मात्रैव वृत्तिः कार्येति भावः । स्पष्टमन्यत् ॥११६॥

दृष्टिदर्शनदृश्यानां विरामो यत्र वा भवेत् दृष्टिस्तत्रैव कर्त्तव्या न नासाग्रावलोकिनी ११७

ननु – तथापि ब्रह्मणि वृत्तिप्रवृत्तिनिमित्तजात्याद्यभावादिन्द्रियादिप्रत्यक्षविषयस्य जगतो ब्रह्मरूपत्वेन दर्शनं कथं स्यादित्याशङ्क्य स्वारस्यात् पक्षान्तरेणाह – दृष्टीति । वाशब्दः पक्षानतरे । दृष्टीय्तादिना श्रोत्रादिसर्वत्रिपुटीनामुपलक्षणम् । यत्र यस्मिन् ब्रह्मस्वरूपे दृष्ट्यादिसर्वत्रिपुटीनां विरामो लयो भवेत्, तत्र तस्मिन्नेव प्रपञ्चातिति(?)दृष्टिरन्तःकरणवृत्तिः कर्त्तव्या, न नासिकाग्रावलोकिनीत्यर्थः ॥११७॥

चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात्
निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ११८

अथ प्राणायामं लक्षयति – चित्तादीति । मनोऽधीनत्वात् प्रानस्य मनोनिरोधेनैव प्राणनिरोधः, न तु प्राननिरोधेनैव पातञ्जलाभिमतेन मनोनिरोधस्तधीनत्वाभावादिति फलितार्थः ॥११८॥

निषेधनं प्रपञ्चस्य रेचकाख्यः सरीरणः
ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः ११९

अमुं प्रानायामं स्वाभिमतेन रेचकादिविभागत्रयेण मक्षयति सार्धेन – निषेधनमिति ॥११९॥

ततस्तद्वृत्तिनैश्चल्यं कुम्भकः प्राणसंयमः
अयं चापि प्रबुद्धानामज्ञानां घ्राणपीडनम् १२०

तत इति । अनात्मोपेक्षाऽऽत्मानुसन्धानतद्दार्ढ्यानि रेचकादिशब्दवाच्यानीति भावार्थः । ननु – अयं त्रिविधोऽपि प्राणायामो न कुत्रापि श्रुत इत्यपेक्षायामत्राधिकारिणमाहार्धेन – अयमिति । अयमुक्तलक्षणः प्राणायामः । चकाराद्भेदत्रययुक्त इत्यर्थः । प्रबुद्धानां प्रकर्षेणासम्भवावनादिरहितत्वेन बुद्धानामात्मबोधयुक्तानाम् । निःसन्देहाऽपरोक्षज्ञानिनामित्यर्थः । योग्य इत्यध्याहारः । तर्ह्यज्ञानां कीदृश इत्यत आह – अज्ञानामिति ॥१२०॥

विषयेष्वात्मतां दृष्ट्वा मनसश्चिति मज्जनम्
प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः १२१

इदानीं प्रत्याहारं लक्षयति – विषयेष्विति । विषयेषु घटादिषु । यद्वा – शब्दादिषु अन्वयव्यतिरेकाभ्यासात्मतां सत्तास्फुरत्ताप्रियतामात्रतां दृष्ट्वानुसन्धाय सनसोऽन्तःकरणस्य चितिमज्जनं नामरूपक्रियानुसन्धानराहित्येन चित्स्वरूपतयाऽवस्थानं स प्रत्याहारः । ततः किमत आह – अभ्यसनीय इति ॥१२१॥

यत्र यत्र मनो याति ब्रह्मनस्तत्र दर्शनात्
मनसो धारणं चैव धारणा सा परा मता १२२

धारणां लक्षयति – यत्रेति । यत्र यत्र यस्मिन् यस्मिन् परार्थे मनो याति गच्छति, तत्र तत्र ब्रह्मणः सत्तादिमात्रस्य नामाद्युपेक्षया दर्शादनुसन्धानान्मनसो धारणं ब्रह्मण्येव स्थिरीकरणं धारणेत्यर्थः । ननु – आधारादिषट्चक्रमध्ये एकत्र मनसो धारणं "धारणा" इति प्रसिद्धमत आह – सेति । साऽत्रोक्तलक्षणा धारणा परोत्कृष्टा मता । तत्वबोधवतामिति शेषः । अना तु

पातञ्जलाभिमता प्रानायामादिवदपरेति भावः । च एवेत्यव्ययद्वयं वेदान्तविद्वदनुभवप्रसिद्धिं द्योतयति ॥१२२॥

ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः धानशब्देन विखाता परमानन्ददायिनी १२३

अथात्मध्यानं लक्षयति – ब्रह्मैवेति । सद्वृत्त्या सती प्रमाणान्तरबाधायोग्या वृत्तिस्तया वृत्त्या निरालम्बतया देहाद्यनुसन्धानराहित्येन स्थितिः, अवस्थानमित्यर्थः । शेषं स्पष्टम् ॥१२३॥

निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञकः १२४

अथान्त्यं समाधिरूपं पञ्चदशमङ्गं लक्षयति – निर्विकारतयेति । निर्विकारतया निषयानुसन्धान-रहिततयाऽन्तःकरणवृत्त्या, पुनरनन्तरमेव ब्रह्माकारतया यत् सम्यक् प्रपञ्चसंस्काररहितं धातृध्येयाकार-वृत्तिशून्यं वृत्तिविस्मरणं द्वैताननुसन्धानं, स समाधिः पञ्चदशमङ्गमित्यर्थः । ननु – वृत्तिविस्मरणस्याज्ञानरूपत्वात् कथं समाधित्वमित्याशङ्क्य, ब्रह्मात्मैक्यबोधाभावे केवलवृत्तिविस्मरणस्य तथात्वेऽपि न ब्रह्मज्ञानसहितस्य तथात्वमित्याशयेन समाधिं विशिनष्टि – ज्ञानसंज्ञक इति । ज्ञानमिति संज्ञा यस्य, स ज्ञानसंज्ञकः । ब्रह्माकारतया स्फुरणरूप इत्यर्थः । उक्तं च – "समाधिः संविदुत्पत्तिः परजीवैकतां प्रति" इति ॥१२४॥

इमं चाकृत्रिमानन्दं तावत् साधु समभ्यसेत् वश्यो यावत् क्षणात् पुंसः प्रयुक्तः संभवेत् स्वयम् १२५

इदानीं यदर्थं साङ्गमिदं निदिध्यासनमुक्तं यदाह – इममिति । अकृत्रिमानन्दं स्वरूपभूतानन्दाभिव्यञ्जकं निदिध्यासनमित्यर्थः । चकाराद्यथाबुद्धि वेदान्तविचारमपीति स्पष्टमन्यत् ॥१२५॥

ततः साधननिर्मुक्तः सिद्धो भवति योगिराट् तत्स्वरूपं न चैतस्य विषयो मनसो गिराम् १२६

एवमभ्या(?)सतः फलमाह – तत इति । साधननिर्मुक्तः साधनाभ्यासरहित इत्यर्थः । एतस्य योगिनः तद्वेदान्तप्रसिद्धं स्वरूपं ब्रह्मैवेति भावः ॥१२६॥

समाधौ क्रियमाणे तु विघ्ना आयान्ति वै बलात् अनुसन्धानराहित्यमालस्यं भोगलालसम् १२७

अखण्डैकरसब्रह्मस्वरूपत्वेनावस्थानलक्षणमोक्षफलदोऽयं समाधिपर्यन्तो योगो गुर्वनुग्रहवता सुकरोऽस्ति, तथापि सुकर इत्यनादरो न कार्यः, विघ्नबाहुल्यसंभवादित्याह द्वाभ्यां – समाधाविति। स्पष्टोऽर्थः ॥१२७॥

लयस्तमश्च विक्षेपो रसास्वादश्च शून्यता एवं यद्विघ्नबाहुल्यं त्याज्यं ब्रह्मविदा शनैः १२८

लय इति। तत्र लयो निद्रा। तमः कार्याकार्याविवेकः। विक्षेपो विषयस्फुरणम्। रसास्वादो धन्योऽ हमित्याद्यानन्दाकारा वृत्तिः। च पुनः शून्यता चित्तदोषः, रागद्वेषादितीव्रवासनया चित्तस्य स्तब्धीभावः कषायः। क्षुब्धतेत्यर्थः। स्पष्टमन्यत् ॥१२८॥

भाववृत्त्या हि भावत्वं शून्यवृत्त्या हि शून्यता ब्रह्मवृत्त्या हि पूर्णत्वं तया पूर्णत्वमभ्यसेत् १२९

वृत्तिरेव बन्धमोक्षकारणमित्याह – भावेति। भाववृत्त्य घटाद्याकारवृत्त्या भावत्वं तन्मयत्वम्। भवतीति शेषः। शून्यवृत्त्या अभाववृत्त्या। शून्यता जडतेत्यर्थः। हीति लोकप्रसिद्धौ। तथा ब्रह्माकारवृत्त्या पूर्णत्वम्। हीति विद्वत्प्रसिद्धौ। ततः किमत आह – पूर्णत्वमिति ॥१२९॥

ये हि वृत्तिं जहत्येनां ब्रह्माख्यां पावनीं पराम् ते तु वृथैव जीवन्ति पशुभिश्च समा नराः १३०

इदानीं ब्रह्ममयीं वृत्तिं स्तोतुं तद्वृत्तित्यागपरान्निन्दति – ये हीति। ये एनां ब्रह्माख्यां वृत्तिं जहति त्यजन्ति, ते तु वृथैव जीवन्तीत्यन्वयः। स्पष्टमन्यत् ॥१३०॥

ये हि वृत्तिं विजानन्ति ज्ञात्वाऽपि वर्धयन्ति ये ते वै सत्पुरुषा धन्या वन्द्यास्ते भुवनत्रये १३१

संप्रति तामेव वृत्तिं विवर्धयितुं ब्रह्मवृत्तिपरान्सत्पुरुषान् स्तौति – ये हीति। स्पष्टम् ॥१३१॥

येषां वृत्तिः समा वृद्धा परिपक्वा च सा पुनः ते वै सद्ब्रह्मतां प्राप्ता नेतरे शबवादिनः १३२

एवं ब्रह्मवृत्तिपरान्स्तुत्वाऽधुना तेषां ब्रह्मप्राप्तिरूपं फलमाह – येषामिति। सुगमम् ॥१३२।

कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः
तेऽप्यज्ञानितया नूनं पुनरायान्ति यान्ति च १३३

तानेव शब्दवादिनो निन्दति – कुशला इति। स्पष्टम्॥१३३॥

निमेषार्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना
यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः १३४

यत एवं, तस्माद् ब्रह्मनिष्ठैर्ब्रह्मवृत्त्यैव सर्वदा स्थातव्यमिति सूचयितुं ब्रह्मादीनामुदाहरणमाह – निमेषेति। यथा ब्रह्माद्यास्तथा सनकाद्याः, यथा सनकाद्यास्तथा शुकाद्या इति संप्रदायो दर्शितः। एतेन ब्रह्मादिसेव्यत्वादतिश्रेष्ठोऽयं समाधिपर्यन्तो राजयोगः सर्वदा मुमुक्षुभिः सेवनीय इति ध्वनितम् ॥१३४॥

कार्ये कारणताऽऽयाता कारणे न हि कार्यता
कारणत्वं ततो गच्छेत् कार्याभावे विचारतः १३५

तदेवं स्वाभिमतं साङ्गं राजयोगमभिधाय पूर्वोपक्रान्तसाङ्ख्यापरपर्यायं वेदान्तविचारमुपसंहरति – कर्य इत्यादिपञ्चभिः श्लोकैः। कार्ये घटपडादिरूपे विकारे कारणतया मृत्तन्त्वादिरूपा सर्वविकाराधिष्ठानता आयाताऽनुगता, कारणे तु कार्यत न(?) हीति प्रसिद्धम्। ततः कारणात् कार्याभावे कारणत्वं गच्छेत्।

ननु – कथं कारणे कार्याभाव इत्यत आह – विचार इति। यथाऽयं दृष्टान्तस्तथाकाशादिकार्ये कारणता। आकाशोऽस्तिभातीत्यादिव्यवहारहेतुभूता सत्यज्ञानादिरूपब्रह्मणः करणता आयाता अनुगता, कारणे ब्रह्मणि तु आकाशादिकार्यता नहीति। परमार्थतः आकाशाद्यभावे ब्रह्मणः कारणताऽपि नहीति दार्ष्टान्तिकोऽर्थः॥१३५॥

अथ शुद्धं भवेद्वस्तु तद्वै वाचामगोचरम्
द्रष्टव्यं मृद्घटेनैव दृष्टान्तेन पुनः पुनः १३६

ततः किमत आह – अथेति। अथानन्तरं कार्यकारणभावनिवृत्तौ यच्छुद्धं मनोवाचामगोचरं वस्तु तद्भवेत्। "यतो वाचो निवर्तन्ते" इत्यादिश्रुतिप्रसिद्धिद्योतनार्थो हिशब्दः। ननु – बुद्धेः क्षणिकत्वेनैकदा तथा विचारितेऽपि पुनरन्यथैव भातीत्यत आह – द्रष्टव्यमिति॥१३६॥

अनेनैव प्रकारेण वृत्तिर्ब्रह्मातिका भवेत् उदेति सुद्धचित्तानां वृत्तिज्ञानं ततः परम्	१३७

न केवलमयं विचारो ज्ञानसाधनमेवापि तु ध्यानसाधनमपीत्याह – अनेनेति। अनेनैव प्रकारेण सुद्धचित्तानां वृत्तिज्ञानमुदेति, ततः परं ब्रह्मात्मिका वृत्तिर्भवेदिति योजना। पदानामर्थस्तु स्फुट एव ॥१३७॥

कारणं व्यतिरेकेण पुमानादौ विलोकयेत् अन्वयेन पुनस्तद्धि कार्ये नित्ये प्रपश्यति	१३८

तमेव विचारं विशदयति द्वाभ्यां – कारणमिति। आदौ प्रथमं कारणं व्यतिरेकेण कार्यविरहेन विचारयेत्। पुनस्तत्कारणमवयेनानुवृत्त्या कार्येऽपि नित्यं प्रपश्यतीति ॥१३८॥

कार्ये हि कारणं पश्येत् पश्चात् कार्यं विसर्जयेत् कारणत्वं ततो गच्छेदवशिष्टं भवेन्मुनिः	१३९

अथवैवं विचारयेदित्याह – कार्येति। आदौ कार्ये कारणमेव विचारयेत्, पश्चात्तत्कार्यं विसर्जयेत् नानुसन्दध्यात्। एवं कार्यवर्जने सति कारणत्वं स्वत एव गच्छेत्। एवं कार्यकारणवर्जनेऽवशिष्टं सच्चिन्मात्रं मुनिर्मननशीलः स्वयमेव भवेदिति ॥१३९॥

भावितं तीव्रवेगेन यद्वस्तु निश्चयात्मना पुमांस्तद्धि भवेच्छीघ्रं ज्ञेयं भ्रमरकीटवत्	१४०

ननु – विचारजन्यापरोक्षज्ञानेन मुनेर्ब्रह्मत्वं भवतु नाम, परन्तु परोक्षज्ञानिनः कथं भवेदित्याशङ्क्य, तीव्रभावनया परोक्षज्ञानोऽपि ब्रह्मत्वं भवेदिति सदृष्टान्तमाह – भावितमिति। अयं भावः – यद्यपि परोक्षज्ञानेन प्रमातृगतावरणनिवृत्तौ सत्यामपि प्रमेयगतमावरणं न निवर्त्तते, तथापि निश्चयात्मना निश्चययुक्तबुद्धिमता पुरुषेण यद्वस्तु सच्चिदानन्दं ब्रह्म तीव्रवेगेनाहर्निशं ब्रह्माकारवृत्त्या भावितं चिन्तितं, तद्वस्तु ज्ञेयमपरोक्षेन ज्ञातुं योग्यं ब्रह्म शीघ्रमचिरेण पुमान् भवेत्। प्रत्यगभिन्नब्रह्मभावनया पुरुषो ब्रह्मरूपो भवतीत्यर्थः। हीति विद्वत्प्रसिद्धौ। तत्र सर्वलोकप्रसिद्धं दृष्टान्तमाह – भ्रमरकीटवदिति। भ्रमरेण कुतश्चिदानीय जीवन्नेव स्वकुट्यां प्रवेशितो यः कीटः स यथा भयात् भ्रमरध्यानेन भ्रमर एव भवति तद्वदिति ॥१४०॥

अदृश्यं भावरूपं च सर्वमेव चिदात्मकम्
सावधानतया नित्यं स्वात्मानं भावयेद्बुधः १४१

यदि पूर्वश्लोकोक्तदृष्टान्तेन भावनाबलादेवान्यस्यान्यत्वं भवेत्, तर्हि ब्रह्मविवर्तत्वेन ब्रह्मरूपस्य विश्वस्य ब्रह्मभावनया तद्रूपता भवेदिति किमु वक्तव्यमित्याशयेन सर्वात्मभावनामाह – अदृश्यमिति । अदृश्यं परोक्षं भावरूपं प्रतक्षं च सर्वं विश्वम् । यद्वा – अदृश्यं द्रष्टृरूपं, भावरूपं दृश्यम् । चकाराद्दर्शनम् । एतत्सर्वं त्रिपुट्यात्मकं जगद्भ्रान्त्याऽऽत्मभिन्नत्वेन भासमानमपि चिदात्मकं निर्विशेषस्फुरणमात्रस्वरूपं स्वात्मानमेव बुधः अद्वैतज्ञाननिष्ठः सावधानतया स्थिरवृत्त्या नित्यं भावयेत्, सकलमिदमहं च ब्रह्मैवेति सर्वदा पश्येदित्यर्थः ॥१४१॥

दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिन्तयेत्
विद्वन्नित्यसुखे तिष्ठेद्धिया चिद्रसपूर्णता १४२

एतदेव विवृणोति – दृश्यमिति । दृश्यं घटादिकमदृश्यतामधिष्ठानचिद्रूपतां नीत्वा । हीति विद्वत्प्रसिद्धौ । ब्रह्माकारेण कल्पितस्य परिच्छिन्नस्य नामरूपादेर्निवृत्तिपूर्वकं बृहदाकारेण परिच्छिन्नरूपेण चिन्तयेदित्यर्थः । ततः किमत आह – विद्वानिति । चिद्रसपूर्णता चिदेव रसश्चिद्रसश्चिदानन्दस्तेन पूर्णता धिया नित्यसुखे अविनाशिसुखे विद्वांस्तिष्ठेदिति ॥१४२॥

एभिरङ्गैः समायुक्तो राजयोग उदाहृतः
किञ्चित्पक्वकषायाणां हठयोगेन संयुतः १४३

इदानीमुक्तं स्वाभिमतयोगमुपसंहरति – एभिरिति । किञ्चित्स्वल्पं पक्वाः दग्धाः कषाया रागादयो येषां, तेषां हठयोगेन पातञ्चलोक्तेन प्रसिद्धेनाष्टाङ्गयोगेन संयुतोऽयं वेदान्तोक्तो योग इति । शेषं स्पष्टम् ॥१४३॥

परिपक्वं मनो येषां केवलोऽयं च सिद्धिदः
गुरुदैवतभक्तानां सर्वेषां सुलभो जवात् १४४

अयं राजयोग एव केषां योग्य इत्याकाङ्क्षायां सर्वग्रन्थार्थमुपसंहरन्नाह – परिपक्वमिति । येषां मनः परिपक्वं, रागादिमलरहितमिति यावत् । तेषामित्यध्याहारः । तेषां जितारिषड्वर्गाणां पुरुषधुरन्धराणां केवलः पातञ्जलाभिमतयोगनिरपेक्षः अयं वेदान्ताभिहितो योगः सिद्धिदः प्रत्यगभिन्नब्रह्मापरोक्षज्ञानद्वारा स्वस्वरूपावस्थान-लक्षणमुक्तिप्रदः । चकारोऽवधारणे । नान्येषामपरिपक्वमनसामित्यर्थः ।

ननु – परिपक्वमनस्त्वमतिदुर्लभमित्याकाङ्क्षायामस्यापि साधनत्वादतोऽप्यन्तरङ्गसाधनमाह – गुरुदैवतभक्तानामिति । जवादतिशीघ्रमित्यर्थः । सर्वेषामिति वर्णाश्रमादिनिरपेक्षं मनुष्यमात्रं ग्रहीतव्यं, अत एव गुरुदैवतभक्तेरन्तरङ्गत्वम् । तथा च श्रुतिः "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" (श्वे०उ०)इति । स्मृतयश्च "तद्विद्धि प्रणिपातेन", "श्रद्धावाँल्लभते ज्ञानम्" इत्याद्याः ।

अयं भावः – परिपक्वमनसामपि दुःसाध्यानि साधनानि, गुरुदैवतभक्तानां सुसाध्यानि भवन्तीति हेतोर्गुरुदैवतभजनमेव स्वधर्माविरोधेन सर्वैः कार्यमिति परमं मङ्गलम् ॥

॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीविद्यारण्यमुनिविरचित-
अपरोक्षानुभूतिदीपिका समाप्तिमगमत् ॥

आत्मबोधः

अथ प्रदीपिका --

प्रकृतिविकृतिभिन्नो योऽवतीर्णः कृपालुः जनिभयमपहर्तुं स्वात्मबोधं प्रचक्रे
मम हृदि निवसन् यो दीपिकां तस्य कुर्वन् तमविकृतमखण्डानन्दबोधं नमामि
१

योऽखण्डानन्दमूर्तिः श्रीदक्षिणामूर्तिरूपतः
अवतीर्णः सदापूर्णमवर्णं तमुपास्महे २
नत्वाऽनन्दगुरुं व्याख्या संक्षेपेण यथामति
क्रियतेऽस्यात्मबोधस्य ममापि ज्ञानसिद्धये ३

> तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम्
> मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते १

अथ टीका ॥ तत्र भगवान् शङ्कराचार्य उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयं निर्माय, तदवलोकनासमर्थानां मन्दबुद्धीनामनुग्रहाय वेदान्तसिद्धान्तसङ्ग्रहमात्मबोधाख्यप्रकरणं दिदर्शयिषुः प्रतिजानीते -- तपोभिरिति । कृच्छ्रचान्द्रायणनित्यनैमित्तिकानुष्ठानरूपैस्तपोभिः क्षीणानि पापानि रागाद्यन्तःकरणदोषा येषां तेषां, नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमिति वचनात् । अत एव शान्तानामक्षोभिताशयानां, वीतरागिणामिहामुत्रफलभोगेच्छारहितानां मुमुक्षूणां संसारग्रन्थिभेदने विततप्रयतात्मनां यथोक्तसाधनसंपन्नानामयमात्मबोधो विधीयते विधिमुखेनावश्यकतया प्रतिपाद्यते इत्यर्थः ॥१॥

प्रदीपिका ॥ इह खलु भगवान् परमकृपालुः श्रीशङ्कराचार्यः मुख्याधिकारिणामुपनिषद्भाष्यं सूत्रभाष्यं गीताभाष्यमिति वेदान्तप्रस्थानत्रयं निर्माय, तदवलोकनाशक्तानां मुमुक्षूणामनुग्रहार्थं सर्ववेदान्तसारसङ्ग्रहमात्म-बोधाख्यं प्रकरणं चिकीर्षुः प्रतिजानीते -- तपोभिरिति ॥ "नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्" इति वचनात् तपोभिः कृच्छ्रचान्द्रायणादिनित्यनैमित्तिकाद्यनुष्ठानैः क्षीणपापानां नष्टकलुषाणाम्, अतः एव शान्तानाम् अक्षोभितचित्तानां -- दमादीनामुपलक्षणमेतत्। वीतरागिणां रागः ऐहिकामुष्मिकसुखभोगेच्छा, स वीतो नष्टो येषां सर्वविरक्तानां इत्यर्थः -- सदसद्विवेकोपलक्षणमेतत्। ईदृशानां मुमुक्षूणां तीव्रमोक्षेच्छावतामपेक्ष्यः अपेक्षणीयः दर्शनीय इत्यर्थ अयमात्मबोधो वक्ष्यमाणमात्मज्ञानप्रकाशकं शास्त्रमित्यर्थः । विधीयते विधिमुखेनोपदिश्यते प्रोच्यत इत्यर्थः ।

अनेन अनुबन्धचतुष्टयमुक्तं भवति। तथा हि विषयः प्रयोजनं संबन्धोऽधिकारीत्यनुबन्धचतुष्टयम् । आत्मबोध इति पदेनात्रात्मज्ञानमेव विषयः । मुमुक्षूणामिति पदेन मोक्ष एव प्रयोजनम्। प्रकाश्यप्रकाशकभावः सम्बन्धः । साधनचतुष्टयसंपन्न एवाधिकारी ।

साधनचतुष्टयं नाम सदसद्विवेको विरागः शमादिषट्कं मुमुक्षुत्वं चेति । तत्र ब्रह्मैव सत्, तदन्यत् सर्वमसदिति पुराणश्रवणादिना स्वयमेव जायमानं ज्ञानं सदसद्विवेकः । इहपरसुखवैरस्यं विरागः । शमः दमः उपरतिः तितिक्षा समाधानं श्रद्धेति शमादिषट्कम् । तत्र शमः अन्तरिन्द्रियनिग्रहः । दमः बाह्येन्द्रियनिग्रहः । विषयेभ्यो निवृत्तानामिन्द्रियाणां पुनर्विषयप्रवृत्तिराहित्येनावस्थितिः सन्यासो वा उपरतिः । शीतोष्णादिदुःखसहनं तितिक्षा । चित्तस्य आत्माभिमुखावस्थानं समाधानम् । गुरौ वेदान्तवाक्येषु च विश्वासः श्रद्धा । मोक्षेच्छा मुमुक्षुत्वमिति संक्षेपः।

तथा च श्रुतिस्मृतयः -- परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदम् आयात् । शान्तोदान्त उपरतिस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति मुमुक्षुर्वै शरणमहं प्रपद्ये । प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे । गुणान्वितायानुगताय सर्वदा प्रदेयमेतत् सततं मुमुक्षवे -- इति ॥१॥

> बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम्
> पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति २

टी०॥ ननु -- तपोयोगमन्त्रकर्मयागाद्यनेकसाधनेषु सत्सु मोक्षं प्रति बोध एव किमिति प्राधान्येन उच्यते इत्यत आह -- बोधोऽन्येति । तपोयोगमन्त्रकर्मयागादीनि साधनानि परम्पराक्रमेण ज्ञानद्वारा मोक्षं साधयन्ति, ज्ञानं तु स्वजन्ममात्रादेवाज्ञानं निःशेषं नाशयित्वा मुमुक्षुं स्वाराज्येऽभिषेचयति, अतोऽन्यसाधनेभ्यो ज्ञानस्य प्राधान्यमुक्तम् । तदेव दृष्टान्तेन द्रढयति -- पाकस्येति । यथा लोके पचनक्रिया काष्ठजलभाण्डादिसाधनेषु सत्स्वपि वह्निं विना न सिध्यति, तद्वत् ज्ञानं विना मोक्षो न सिध्यतीत्यर्थः ॥२॥

प्र०॥ ननु, मोक्षसंपादने गङ्गास्नानकृच्छ्रचान्द्रायनाग्निहोत्रस्तोत्रमन्त्र-जपाद्यनेकसाधनेषु सत्सु किम् आत्मज्ञानेन इत्याकाङ्क्षायाम् आह -- बोध इति । अन्यसाधनेभ्यः आत्मज्ञानव्यतिरिक्तेभ्यः कृच्छ्रचान्द्रायणादि-कर्मयोगेभ्यः सर्वेभ्यः बोधः ज्ञानं ब्रह्मात्मैक्यविषयं साक्षादितरानपेक्षमपरोक्षं मोक्षैकसाधनं मोक्षस्य साधनसाध्यश्रवणादिजन्यज्ञानद्वारा स्वस्वरूपावस्थानलक्षणस्य एकसाधनं मुख्यकारणम्। हि यस्मात् कारणात् पाकस्य पचनक्रियायां वह्निवत् यथा सलिलतण्डुलेन्धनादिसाधनेषु सत्स्वपि अग्निं विना पाको न जायते तथा ज्ञानं ब्रह्मात्मैक्यविषयं विना मोक्षः उक्तलक्षणः न सिद्ध्यति । यस्मात् नित्यनैमित्तिकादिसाधनं

चित्तशुद्धिद्वारा क्रमेण मुक्तिं साधयिष्यति । ज्ञानं तु जन्ममात्रेण साक्षात् मोक्षं प्रयच्छति । तस्मात् केवलज्ञानस्यैव साक्षात् मोक्षहेतुत्वमिति भावः॥

ननु, विद्वान् यजते -- यावज्जीवमग्निहोत्रं जुहुयात्। श्रौतं वापि तथा स्मार्तं कर्मालम्ब्य वसेद्द्विजः तद्विहीनः पतत्येव ह्यालम्बरहितान्धवत् । कर्मणैव हि संसिद्धिमास्थिता जनकादयः -- इत्यादिश्रुतिस्मृतिभगवद्वचनात् न केवलज्ञानस्य मुक्तिहेतुत्वं वक्तव्यं किन्तु कर्मसमुचितस्य एव चेत् -- न । ज्ञानकर्मणोः स्थितिगतिवत् परस्परविरोधित्वेनैकबुद्ध्याश्रयत्वानुपपत्तेः । "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ । ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥" (भ०गी०) इति बुद्धिद्वयविषयत्वेन भगवतैव प्रतिपादितत्वाच्च ।

तर्हि विद्वान् यजत इत्यादिश्रुत्यादीनां वाहतिरिति चेनत् -- न । विद्वान् यजत इत्यत्र द्रव्यमन्त्रतन्त्रादिपरिज्ञानवानिति विद्वच्छब्दार्थस्य वक्तव्यत्वात्, तस्य कार्यं न विद्यते । नैवास्ति किञ्चित् कर्तव्यमस्ति चेन्न स तत्वविदिति परमार्थविदां कर्तव्याभावस्मरणाच्च । यावज्जीवश्रुतेः । श्रौतं वापि तथा स्मार्तमित्यादिस्मृतेश्च चित्तशुद्धिपर्यन्तोपयोगित्वात् यदहरेव विरजेत्, तदहरेव प्रव्रजेदित्यादिश्रुतेः । तावत् कर्माणि कुर्वीत् न निर्विद्येत यावता इत्यादिस्मृतेश्च । कर्मणैव हि संसिद्धिमास्थिता जनकादयः इत्यत्र यदि तावत् पूर्वे जनकादयः तत्त्वविदोऽपि प्रकृतकर्माणः स्युः ते लोकसङ्ग्रहार्थं गुणा गुणेषु वर्तन्त इति ज्ञानेन संसिद्धिमास्थिताः कर्मसन्यासं कृतवन्त इत्यर्थः । अथ न ते तत्त्वविदः ईश्वार्पितेन कर्मणा साधनभूतेन संसिद्धिं सत्त्वशुद्धिं ज्ञानोत्पत्तिलक्षणां वा सिद्धिमास्थिता जनकादय इति व्याख्येय्मित्युपोद्घातप्रकरणे श्रीभाष्यकृद्भिः प्रतिपादितत्वाच्च ।

ननु -- "साङ्ख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः । एकमप्याशितः सम्यगुभयोर्विन्दते फलम् ॥ यत् साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते । एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥" (भ०गी०) इति गीतायां साङ्ख्ययोगयोः फैकत्वस्मरणात् कर्मणश्च साक्षान्मोक्षहेतुत्वमिति चेत् -- न । अस्य वचसः कर्मस्तुति-परत्वादीश्वरार्पणबुद्ध्या क्रियमाणस्य कर्मणश्चित्तशुद्धिद्वारा ज्ञानहेतुत्वेन मोक्षहेतुत्वस्य विवक्षितत्वात् काम्यकर्मणः बन्धहेतुत्वात् । "दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय । बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥" (भ०गी०) इत्यादिभगवद्वचनाच्च । तस्मात् सिद्धं केवलज्ञानस्यैव साक्षान्मोक्षहेतुत्वं, न तु कर्मसमुच्चितस्य ज्ञानस्येति । ज्ञानादेव तु कैवल्यं, न कर्मणामनुष्ठानैर्नदानैर्स्तपसापि वा । "कैवल्यं लभते मर्त्यः किन्तु ज्ञानेन केवलम्" इत्यादि श्रुतिस्मृतिप्रसिद्धेश्च । अनेन ज्ञानिनां कर्माभावः सूचितः ॥२॥

> अवरोधितया कर्म नाविद्यां विनिवर्तयेत्
> विद्याऽविद्यां निहन्त्येव तेजस्तिमिरसङ्घवत् ३

टी०॥ ननु -- कर्मणां विचित्रशक्तित्वात् कर्मैवाज्ञानं नाशयिष्यति, किमात्मज्ञानेनेत्याशङ्क्याह -- अविरोधितयेति। स्पष्टार्थः ॥३॥

प्र०॥ कर्मणां विचित्रशक्तिमत्वात् कर्मैवाल्पमज्ञानं नाशयिष्यति । पुनः किमात्मज्ञानेनेत्याशङ्कायाम् अज्ञानकर्मणोर्विरोधाभावात् न निवर्तयेदित्याह -- अविरोधितेति । कर्म नित्यनैमित्तिकादि सर्वमविरोधितयाऽप्रतिपक्षत्वेन अविद्याम् अज्ञानं न विनिवर्तयेत्, न विनाशयेत्। किन्तु, मेघावरणमभावास्याधकारमिव

> परिच्छिन्न इवाज्ञानात् तन्नशे सति केवलः
> स्वयं प्रकाशते ह्यात्मा मेघापायेंऽशुमानिव ४

ननु -- प्रतिशरीरमात्मा परिच्छिन्न इवोपलभ्यते, कथं कैवल्यमित्याह -- परिच्छिन्न इति । परिपूर्णस्याद्वितीयस्यात्मनोऽज्ञानविकल्पितोच्चावचशरीराध्यासकृतपरिच्छिन्नत्वमेव, न तु तत्त्वदृष्ट्या, अतो विवेकेनाविवेकहानात् आत्मा केवल एव प्रकाशते मेघावरणाभावे भानुवदित्यर्थः ॥४॥

> अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम्
> कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ५

ननु -- आत्मज्ञानादद्वैतसिद्धिरयुक्ता, वृत्तिज्ञानेन द्वैतसिद्धेरित्यत आह -- अज्ञानकलुषमिति । अज्ञानकार्यभूतैरहङ्कारादिभिः कलुषीकृतं कर्तृभोक्तृत्वाद्यभिमानिनं जीवं, ज्ञानं चिरकालाभ्यासादज्ञानहानद्वारा तत्कार्यान्तःकरणादिकमशेषतो नाशयित्वा स्वयमपि नश्यत्यज्ञानकार्यत्वाद्वृत्तेः तत्प्रतिबिम्बितं ज्ञानमात्माभासत्वाद् आत्मन्येव एकीभवति। तदानीमद्वय एवात्मा प्रकाशते यथा कतकरेणुरखिलं जलं निर्मलं कृत्वा स्वयमपि नश्यति तद्वदित्यर्थः ॥५॥

> संसारो स्वप्नतुल्यो हि रागद्वेषादिसंकुलः
> स्वकाले सत्यवद्भाति प्रबोधे सत्यसन्भवेत् ६

ननु -- अपरोक्षतयाऽनुभूयमानस्य संसारस्य कथमत्यन्तासत्त्वं प्रत्यक्षविरुद्धमित्याशङ्क्य स्वप्नदृष्टान्तेन तस्य मिथ्यात्वं साधयति -- संसारेति । रागद्वेषादिभिः संसारः संकुलायमानः, स्वकाले स्वस्य कारणभूताज्ञाने स्थिते सति, तावन्मिथ्याभूतेऽपि संसारः सन्नेवावभाति । प्रबोधे सति, वाक्यार्थश्रवणादात्मज्ञानोत्पत्तौ असन्नेव भवति। अत्र दृष्टान्तः स्वप्नतुल्य इति। स्वप्नेऽपि

यावन्निद्राऽनुभूयते, तावन्मिथ्याभूतोऽपि सत्य इव भाति, प्रबोधे निद्रानाशे सति, स्वप्नो मिथ्या भवति, तद्वत् संसार इत्यर्थः ॥६॥

तावत् सत्यं जगद्भाति शुक्तिकारजतं यथा यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमद्व्यम् ७

जगन्मिथ्यात्वं दृष्टान्तेन द्रढयति -- तावदिति । यथा यावन्नीलपृष्ठत्रिकोणादिविशेषज्ञानं नोत्पद्यते, तावद्रजतज्ञानं सत्यमिवानुभूयते । तथा सर्वाधिष्ठानभूतं सच्चिदानन्दाद्वयं ब्रह्म यावन्न ज्ञायते साक्षानानुभूयते, तावज्जगदाकारेन परिणतः संसारः सत्य इव भ्रान्त्या दृश्यते इत्यर्थः ॥७॥

उपादानेऽखिलाधारे जगन्ति परमेश्वरे सर्गस्थितिलयान् यान्ति बुद्बुदानीव वारिणि ८

श्लोकोऽयं बहुमुद्रितोऽपि टीका नोपलभ्यते ॥८॥

सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः व्यक्तयो विविधाः सर्वा हाटके कटकादिवत् ९

सर्वं दृश्यं प्रपञ्चजातं ब्रह्मण्येव मायया कल्पितमिति प्रतिपादयति -- सच्चिदात्मनीति । सत्यज्ञानानन्दात्मनि नित्ये सर्वानुस्यूते व्यापके ब्रह्मणि, सर्वा व्यक्तयो देवतियङ्नरस्थावरजङ्गमादयोऽपि विविधा अपि वक्तयः, सर्वोपादानभूते परमेश्वरे हाटके हेम्नि कटकमुकुटादय इव कल्पिता एव, ब्रह्मणोऽभिन्ना इत्यर्थः ॥९॥

यथाकाशो हृषीदेशो नानोपाधिगतो विभुः तद्भेदाद् भिन्नवद् भाति तन्नाशे केवलो भवेत् १०

उक्तमर्थमाकाशदृष्टान्तेन द्रढयति -- यथाकाशेति । हृषीकेशो मनःप्रभृतिसर्वेन्द्रियप्रवर्तको नियामको वा, विभुः सर्वगतः परमेश्वरः स्वमायाकल्पितनानाविधोपाधिषु प्रतिबिम्बितः सन्नानेव(?) भाति, तन्नाशे सति ब्रह्मात्मैक्यज्ञानेन तेषां मायापरिकल्पितानां नाशात् केवल एव भाति, यथाकाशो नानोपाधिवशान्नानेव भाति उपाधिलयादेक एव भाति, तद्वदित्यर्थः ॥१०॥

नानोपाधिवशादेव जातिनामाश्रमादयः आत्मनारोपितास्तोये रसवर्णादिभेदवत् ११

ननु -- सर्वदेहेषु तत्तज्जात्यादिभिरनुविद्धस्य कथं नित्यत्वमुच्यते तत्राह -- नानोपाधीति । पूर्वोक्तनानोपाधिवशादेवात्मनि जातिनामाश्रमादा आरोपिता मायापरिकल्पिता, न तु स्वतः यथा

स्वभावमधुरं जलं कटुकषायाम्लरक्तपीतादिद्रव्योपेतं सत् तद्रूपं भजति, न तु स्वरूपतस्तद्वदित्यर्थः ॥११॥

> पञ्चीकृतमहाभूतसंभवं कर्मसञ्चितम्
> शरीरं सुखदुःखानां भोगायतनमुच्यते १२

आत्मनोऽविद्यापरिकल्पितोपाधित्रयमाह -- पञ्चीकृतेति । पञ्चानां भूतानां प्रत्येकं द्विधा विभज्य, तत्रैकैकमर्धं चतुर्धा समं विभज्य, स्वांशं परित्यज्येतरेशु योजनं पञ्चीकरणम् । एवं पञ्चीकृतेभ्यः स्थूलपृथिव्यादिमहाभूतेभ्यः संभवो यस्य, तत् सर्मसञ्चितं प्रारब्धकर्मभिः सञ्चितं रचितं स्थूलशरीरं दुखदुःखभोगानामायतनं भोगस्थानं प्रत्यगात्मन इति ॥१२॥

> पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्
> अपञ्चीकृतभूतोत्थं सुक्ष्माङ्गं भोगसाधनम् १३

सूक्ष्मोपाधिमाह -- पञ्चप्राणेति । पञ्चप्राणा एकस्यैव महाप्राणस्य प्राणादयो वृत्त्यः, ज्ञानेन्द्रियकर्मेन्द्रियभेदेनेन्द्रियाणि दश, मनःशब्देन संकल्पविकल्पात्मकान्तःकरणवृत्तिर्बुद्धिर्निश्चयात्मिका, एतैः संयुक्तमपञ्चीकृतसूक्ष्मभूतोत्थं सूक्ष्मभूतेभ्यो जातं सूक्ष्माङ्गं लिङ्गशरीरं सुखदुःखभ्योगसाधनमित्यर्थः ॥१३॥

> अनाद्यविद्यानिर्वाच्या कारणोपाधिरुच्यते
> उपाधित्रितयादन्यमात्मानमवधारयेत् १४

तृतीयं कारणोपाधिमाह -- अनाद्यविद्येति । सदसद्भामनिर्वाच्याऽनादिभूता कारणोपाधिरुच्यते, सा च व्यष्टिसमष्टिभेदेन स्थूलसूक्ष्मप्रपञ्चयोः कारणभूतत्वात् कारणोपाधिरुच्यते । उपाधित्रयकथनप्रयोजनमाह -- उपाधित्रितयतादन्यमिति । तत्साक्षिणमात्मानमवधारयेज्जानीयादित्यर्थः ॥१४॥

> पञ्चकोशादियोगेन तत्तन्मय इव स्थितः
> शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा १५

ननु -- अन्नमयाद्ये(?)षु कोशेषु व्याप्य तत्तन्मयतया स्थितस्य कुतो नित्यमुक्तत्वमित्याशङ्क्याह -- पञ्चकोशादीति । अन्नयमप्राणमयमनोमयविज्ञानमयानन्दमयाः पञ्चकोशाः, आदिशब्देनाशनादीनां ग्रहणम्, एतैर्योगेन मिथ्यातादात्म्येन तत्तन्मय इव स्थित आत्मा शुद्धो, न तु तेषु वस्तुतो रञ्जनाविशिष्टोऽपि । "स वा एष पुरुषोऽन्नरसमय" (तै०उ०)

इत्यादिभिः सूक्ष्मवस्तुदर्शनार्थमेवोपाधिस्थं ब्रह्म सूचयति, न तु तत्त्वदृष्ट्या, यथा निर्मलस्फटिको नीलपीतवस्त्रादियोगेन तत्तन्मय इव भावति । वस्तुतो नास्ति रञ्जना, तद्वदित्यर्थः ॥१५॥

वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यवघाततः
आत्मानमान्तरं शुद्धं विविञ्च्यात् तण्डुलं यथा १६

असङ्गात्मस्वरूपज्ञानविवेचनप्रकारमाह -- वपुरिति । वपुः स्थूलशरीरं तदिव तुषस्तदादिभिर्युक्तं तण्डुलमिव पञ्चकोशैस्तावत् स्थितमान्तरमात्मानं युक्त्यवघाततः युक्तिरूपावहननात् शुद्धं विविञ्च्यात् विवेकेन जानीयादित्यर्थः ॥१६॥

सदा सर्वगतोऽप्यात्मा न सर्वत्रावभासते
बुद्धावेवाभासेत स्वच्छेषु प्रतिबिम्बवत् १७

ननु -- आत्मा सर्वगतस्तर्हि किं सर्वत्र सर्वैर्न दृश्यते इत्यत्राह -- सदा सर्वगत इति । आत्मा सर्वगतोऽपि सर्वत्र व्याप्य स्थितोऽपि जडैर्बहिवृत्तिभिरक्षैर्न प्रकाश्यते, रागादिभिरविद्धायां बुद्धावेव प्रकाशते न सर्वत्र, यथा प्रतिबिम्बः स्वच्छेष्वेव दर्पणादिषु दृश्यते, नान्यत्र तद्वदित्यर्थः ॥१७॥

देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम्
तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत् सदा १८

देहेष्ववस्थितस्याप्यात्मन औदासीन्यं राजपुरुषदृष्टान्तेनाह -- देहेन्द्रियेति । देहेन्द्रियमनोबुद्धिप्रकृतयः किंभूताः ? जडाः परिणामिण्यो दृश्याश्चेति । देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो जडदृश्यपरिणामिभ्यो विलक्षणमात्मानं तद्वृत्तीनां साक्षितया स्थितं, यथा राजा स्वनगरे स्थितो मन्त्रिषु प्रवर्तमानेषु स्वयं साक्षितया तान् पश्यन् तिष्ठति, तद्वदेव जानीयादित्यर्थः ॥१८॥

व्यापृतेष्विन्द्रियेष्वात्मा व्यापारीवाविवेकिनाम्
दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी १९

ननु -- आत्मनोऽविकारित्वमयुक्तं यतः सर्वदा व्यापारवान् दृश्यते, तत्राह -- व्यापृतेष्विति । इन्द्रियादिषु व्यापृतेषु सत्सु आत्मा व्यापारीवाविवेकिनां गुरुशास्त्रादिरहितानां दृश्यते । न तु तत्त्वदृशाम् । यथा मेघखण्डेषु वायुवशाद् धावत्सु चन्द्रोऽपि भावतीव लोकैर्दृश्यते, न तु चन्द्रमा धावति तथा आत्मापीत्यर्थः ॥१९॥

आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः
स्वकीयार्थेषु वर्त्तन्ते सूर्यालोकं यथा जनाः   २०

ननु -- देहेन्द्रियमनोबुद्धयश्चेतना दृश्यन्ते, किमात्मना, तत्राह -- आत्मचैतन्यमिति । नित्यज्ञानस्वरूपमात्मचैतन्यमाश्रित्य देहेन्द्रियमनोबुद्ध्यादयः स्वकीयार्थेषु स्वविषयेषु वर्तन्ते, यथा प्राणिनः सूर्यप्रकाशमाश्रित्य स्वव्यापारेषु व्यवहरन्ति । अतश्चैतन्यमात्मन एव, देहेन्द्रियादयो जड एवेत्यर्थः ॥२०॥

देहेन्द्रियगुणान् कर्मण्यमले सच्चिदात्मनि
अध्यस्यन्त्यविवेकेन गगने नीलतादिवत्   २१

ननु -- अहं जातोऽस्मि बाल्यकौमाराद्यवस्थामनुभवामीत्याद्यनवरतमनुभूयमानस्यात्मनः कथमविकारित्वमित्यत आह -- देहेन्द्रियेति । देहेन्द्रियमनोबुद्धिधर्मांश्चतुर्णां सत्त्वादीन् कर्माणि च कर्मेन्द्रियव्यापारान् मिथ्यातादात्म्येन स्थितेऽमलेऽसङ्गरूपे सच्चिदानन्दात्मके परमात्मन्येव एतत्सामीप्यादविकेकातोऽध्यस्यन्ति, यथा गगने नीलतादि । अतस्ते आत्मधर्मा न भवन्ति, किन्तु देहादीनामेवेत्यर्थः ॥२१॥

अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि
कल्प्यन्तेऽम्बुगते चन्द्रे चलनादि यथाम्भसः   २२

ननु -- कर्तृत्वभोक्तृत्वादिकमात्मनि सदैवानुभूयमानत्वाद् दुर्वारमित्याशङ्क्य तदपि तथैव मिथ्येत्याह -- अज्ञानादिति । अज्ञानान्मानसोपाधेस्तस्यैव कर्तृत्वादयो धर्मा अतत्त्वज्ञानवशादात्मनि कल्प्यन्ते, यथाऽम्भसश्चलनादिकमम्बुनि प्रतिफलिते चन्द्रेऽविवेकतः कल्प्यते तद्वदित्यर्थः ॥२२॥

रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्तते
सुसुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः   २३

इच्छाद्वेषसुखदुःखादीन् आत्मनः मन्यन्ते वैशेषिकादयः, तन्निराकरोति -- रागेच्छेति । रागेच्छादिसुखदुःखप्रयत्नादिकं सर्वं बुद्धेरेव, न त्वात्मनः । कथम् ? जाग्रत्स्वप्नयोर्बुद्धौ सत्यां रागादि प्रवर्तते, सुसुप्तौ तस्या बुद्धेर्नाशे कारणे लये न प्रवर्तते, तस्मात् बुद्धेरेव धर्मा न त्वात्मन इत्यर्थः ॥२३॥

> प्रकाशोऽर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता
> स्वभावः सच्चिदानन्दनित्यनिर्मलतात्मनः २४

तर्हि कीदृगात्मस्वभाव इत्याशङ्क्यात्मस्वभावमुपदिशति -- प्रकाश इति । यथा प्रकाश एवार्कस्य स्वभावः, तोयस्य शैत्यम्, अग्नेरुष्णता, तथाऽत्मनोऽपि सच्चिदानन्दनित्यनिर्मलता स्वभावः स्वरूपम्तियर्थः ॥२४॥

> आत्मनः सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयम्
> संयोज्य चाविवेकेन जानामीति प्रवर्तते २५

यद्यविकार्यात्मा, तर्हि जानामीति प्रत्ययः कथमित्यपेक्षायामाह -- आत्मन इति । प्रत्यगात्मनः सच्चिदंशः, अंश इवांश आत्माभासो बुद्धिवृत्तिश्चैतद्द्वयमविवेकेन संयोज्य, यद्यप्यसङ्गस्यात्मनः केनापि संयोगो नास्त्येव, तथाप्यज्ञानवशान्मेलनं संभाव्य, जानामीति प्रत्ययोऽहङ्कारवृत्तिः प्रवर्तते । केवले प्रत्यगात्मनि न कश्चिद्विकारोऽस्तीति भावः ॥२५॥

> आत्मनो विक्रिया नास्ति बुद्धेबोधो ना जात्विति[7]
> जीवः सर्वमलं ज्ञात्वा ज्ञाता द्रष्टेति मुह्यति २६

एतदेव स्पष्टयति -- आत्मनो विक्रिया नास्तीति । आत्मा स्वभावादेव विक्रियारहितः, बुद्धेः कदाचिदपि बोधशङ्कैव नास्ति । तथापि जीवः साभासाहङ्कारः साभासान्तःकरणः सर्वं ज्ञात्वाऽहं ज्ञाता द्रष्टेति मुह्यति भ्रान्तो भवतीत्यर्थः ॥२६॥

> रज्जुसर्पवदात्मानं जीवं ज्ञात्वा भयं वहेत्
> नाहं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत् २७

आत्मा स्वयमेव स्वस्मिन्नविवेकेन अन्यधर्मानारोप्य बिभेतीत्याह -- रज्जुसर्पवदिति । यथा मन्दान्धकारादौ सर्पारोपं कृत्वा, भयकम्पादिकं वहेदेवमात्माऽपि स्वस्मिन् जीवत्वमारोप्य स्वं द्वितीयं परिच्छिन्नं ज्ञात्वा, भयं वहेद् दुःखसागरे निमग्नो भवति । यदा शास्त्राचार्यप्रतिपादितेन शास्त्रार्थज्ञानमुत्पन्नं भवति, तदा विवेकचक्षुषा स्वमात्मानमखण्डानन्दज्ञानैकरूपं संपश्यन्, ततो नाहं जीवः, परमात्माऽहमिति ज्ञात्वा भयदुःखरहितः सुखी भवेत् ॥२७॥

[7] जात्वपीति पाठान्तरम्

आत्माऽवभासयत्येको बुद्ध्यादीनीन्द्रियाणि च दीपो घटादिवत् स्वात्मा जडैस्तैर्नावभास्यते २८

ननु -- आत्मा अत्यन्तसामीप्यकैर्बुद्धिमनोऽहङ्कारादिभिः कथं नावलोक्यते न ज्ञायते, तत्राह -- आत्मेति । आत्मा केवल एव सन्नपि बुद्धिमनोऽहङ्कारादीन्यवभासयति, तैर्जडैर्मनआदिभिरात्मा नावभास्यते, यथा एक एव दीपो घटादीन् सर्वानप्यवभासयति, तैर्घटादिभिर्दीपो नावभास्यते, तद्वदित्यर्थः ॥२८॥

स्वबोधे नान्यबोधेच्छा बोधरूपतयात्मनः न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने २९

आत्मा बुद्ध्यहङ्कारादिभिर्नावभास्यते यदि, तर्हि आत्मज्ञाने ज्ञानान्तरेण भवितव्यमित्याशङ्क्याह -- स्वबोध इति । आत्मनो बोधरूपत्वात् स्वबोधे नित्ये सति, तस्यात्मनो बोधाय ज्ञानान्तरापेक्षा नास्त्येव, अनुभवरूपत्वात्, यथा दीपस्य स्वप्रकाशकाले दीपान्तरापेक्षा नास्ति, तद्वदित्यर्थः ॥२९॥

निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः विद्यादैक्यं महावाक्यैर्जीवात्मपरमात्मनोः ३०

यदि बुद्ध्यादिभिरात्मा ज्ञेयो न भवेत्, तर्हि आत्मज्ञाने उपायान्तरं वाच्यम् । स उपायः क इत्याह -- निषिध्येति । अथात आदेशो नेति नेतीत्यतन्निरसनवेदवाक्यैर्निखिलोपाधीन्निषिध्य, अनात्मत्वेन ज्ञात्वा तं निरस्य "तत्त्वमसि" (छा०उ०६,११), "अयमात्मा ब्रह्म" (मा०उ०१) इत्यादि महावाक्यैर्लक्षणया ब्रह्मात्मैक्यज्ञानं विद्यात् प्राप्नुयात् । अनेन प्रकरेण ज्ञातव्यमित्यर्थः ॥३०॥

आविद्यकं शरीरादि दृश्यं बुद्बुदवत् क्षरम् एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलम् ३१

आत्मस्वरूपज्ञाने अतन्निरसनाभावे का क्षतिरित्याशङ्क्य अतन्निरसाभावे आत्मा ज्ञातुमशक्यः, यथा नायं सर्प इत्यारोपितस्यापकरणाभावे रज्जुज्ञानं नोत्पद्यते, तद्वदनात्मनिरसनाभावे आत्मा न ज्ञायते इत्याशयवानाह -- आविद्यकमिति । देहेन्द्रियादि सर्वं दृश्यजातमाविद्यकं दृश्यत्वात्, बुद्बुदवत् क्षरं नश्वरम् । एतद्विलक्षणं निर्मलं निरुपाधिकं नित्यमेकं सच्चिदानन्दात्मकं ब्रह्मैवाहमस्मीति विद्यात्, ततः कृतकृत्यो भवतीत्यर्थः ॥३१॥

देहान्यत्वान्न मे जन्म जडाकार्श्यलयादयः शब्दादिविषयैः सङ्गो निरिन्द्रियतया न च ३२

एवमुक्तरीत्याऽऽत्मानमद्वयानन्दं वाक्यार्थज्ञानेनापरोक्षतया ज्ञात्वा, स्वानुभवविष्टम्भेनात्मन्येवात्मना मननप्रकारमाह पञ्चभिः श्लोकैः -- देहान्यत्वादिति । जडदृश्यत्वादिस्वभावस्थूलशरीरान्यत्वात् मे मम जन्मजडाकार्श्यादयो न सन्ति, इन्द्रियादिभिरसङ्गत्वाच्छब्दादिविषयभोगैः सङ्गानुभवो नास्त्येव ॥३२॥

अमनस्त्वान्न मे दुःखरागद्वेषभयादयः अप्राणो ह्यमना शुभ्र इत्यादि श्रुतिशासनात् ३३

अमन्स्त्वादिति । कथमिन्द्रियप्राणमनसा नावभासते इत्याशङ्क्य श्रुतिं प्रमाणयति । अप्राण इति (मु०उ०२,१) स्पष्टार्थः ॥३३॥

निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरञ्जनः निर्विकारो निराकारो नित्यमुक्तोऽस्मि निर्मलः ३४

गुरोः प्रसादात् स्वानुभवसिद्धमर्थमभिनयति -- निर्गुण इत्यादिभिस्त्रिभिः श्लोकैः । अहं निर्गुणो बुद्ध्याभावात्, निष्क्रिय इन्द्रियाद्यभावात्, नित्योऽपरोक्षत्वात्, निर्विकल्पो विकल्पाभावात्, निरञ्जनोऽसङ्गत्वात्, निर्विकारो निरवयवत्वात्, नित्यमुक्तो बन्धाभावात्, निर्मलोऽविद्यातत्कार्यरहितत्वात् ॥३४॥

अहमाकाशवत् सर्वं बहिरन्तर्गतोऽच्युतः सदा सर्वसमः शुद्धो[8] निःसङ्गो निर्मलोऽचलः ३५

ननु -- पूर्वोक्तहेतुभिरेवं विशिष्टस्वरूपं सिद्धमित्युक्तं, तत् किंविशिष्टमित्याशङ्क्याह -- अहमाकाशवदिति । अहमाकाशवत् सर्वस्य दृश्यजडस्य बहिरन्तर्गतोऽच्युतः च्युतिरहितः, सदा सर्वसमो विषमेष्वपि समतया व्याप्य स्थितः, तथा शुद्धो निर्लेपः, अचलः पूर्णस्य चलनाभावात् ॥३५॥

[8] सिद्धो इति पाठान्तरम्

नित्यशुद्धविमुक्तैकमखण्डानन्दमद्वयम्[9] सत्यं ज्ञानमनन्तं यत् परं ब्रह्माहमेव तत् ३६

नित्यशुद्धेति । एकमखण्डानन्दं द्वितीयाभावादद्वयं सत्यं ज्ञानमनन्तं परं ब्रह्मेति श्रुत्या (तै०उ०२,१) प्रतिपाद्यते, तदेव तत् परं ब्रह्मैवाहमस्मीति स्वरूपं कथितम् ॥३६॥

एवं निरन्तरकृता ब्रह्मैवास्मीति वासना हरत्यविद्याविक्षेपान् रोगानिव रसायनम् ३७

पूर्वश्लोकोक्तमननं चिरकालाभ्यस्तं सत् किं पुरुषार्थं साधयतीत्याह -- एवं निरन्तरकृतेति । एवमुक्तप्रकारेण ब्रह्मैवाहमस्मीति नैरन्तर्येण चिरकालाभ्यस्ता वासना अविद्याकृतविक्षेपन्निःशेषतो नाशयति, यथा रसायनमौषधं चिरकालसेवितं सद् रोगान्निःशेषतो नाशयति तद्वदित्यर्थः ॥३७॥

विविक्तदेश आसीनो विरागो विजितेन्द्रियः भावयेदेकमात्मानं तमनन्तमनन्यधीः ३८

ब्रह्मानुसन्धाने साधननियमानाह -- विविकदेश इति । जनसंबन्धवर्जिते देशे आसीनः सुखोपविष्टः, विरागः सर्वत्र गताभिलाषोऽत एव निर्जितानीन्द्रियाणि येन सः, अनन्तमपरिच्छिन्नमेकमद्वयं तमात्मानम्, अनन्यधीर्ब्रह्मण्येव स्थिता निश्चयात्मिका बुद्धिर्यस्य तादृशो भावयेद् ध्यायेत् ॥३८॥

आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः भावयेदेकमात्मानं निर्मलाकाशवत् सदा ३९

दृश्यप्रपञ्चे जाग्रति सति कथमेतत्तत्त्वभावना संभवतीत्यत आह -- आत्मन्येवेति । अखिलं दृश्यजातं सुधीः शुद्धान्तःकरणः सन् सुद्धया धिया आत्मन्येव समाधिसमये प्रविलाप्य प्रकर्षेण नाशयित्वा तदा द्वितीयाभावादेकमात्मानं सज्योतिष्काकाशवद् भावयेदवतिष्ठेत् ॥३९॥

रूपवर्णादिकं सर्वं विहाय परमार्थवित् परिपूर्णचिदानन्दस्वरूपेणावतिष्ठते ४०

परमार्थदर्शी मुनिर्नामरूपवर्णादिकं सर्वं विहाय, परिपूर्णज्ञानानन्दरूप एवावतिष्ठते इत्यत आह -- रूपवर्णादिकमिति । स्पष्टार्थः ॥४०॥

---

[9] अव्ययम् इति पाठान्तरम्

ज्ञातृज्ञानज्ञेयभेदः परे नात्मनि विद्यते चिदानन्दैकरूपत्वाद्दीप्यते स्वयमेव हि ४१

ननु -- मात्रादित्रिपुटिज्ञानं वर्तमानमुपलभ्यते कथमेकत्वभावनेत्याशङ्क्य परमात्मनि भेदो नास्त्येवेत्याह -- ज्ञात्रिति । ज्ञातृज्ञानज्ञेयभेदः कल्पित आत्मन्यवभाति, ज्ञानानन्दैकरूपत्वादात्मा स्वयमेव दीप्यते प्रकाशते ॥४१॥

एवमात्मारणौ ध्यानमथने सततं कृते उदितावगतिज्वाला सर्वाज्ञानेन्धनं दहेत् ४२

एवं विशुद्धवस्तुध्यातुः प्रत्यक्षफलमाह -- एवमात्मेति । आत्मैव पूर्वोऽरणिरन्तःकरणमेवोत्तरारणिः ध्यानेन तयोर्मथने सर्वदा कृते तत्रोदिता ज्वालारूपावगतिर्ज्ञानं विद्या अज्ञानमेवेन्धनं मूलाज्ञानं निःशेषतः सपरिकरं नाशयति । तदा मुमुक्षुः स्वाराज्येऽभिषिक्तः कृतकृत्यो भवतीत्यर्थः ॥४२॥

अरुणेनेव बोधेन पूर्वं संतमसे हृते तत आविर्भवेदात्मा स्वयमेवांशुमानिव ४३

जीवपरयोरत्यन्तैक्यज्ञानेनाविद्यापरिकल्पिते संतमसि निःशेषमपगते सति, परमात्मा स्वयमेवाविर्भवेदित्याह -- अरुणेति । अरुणप्रकाशेनादौ अन्धकारे क्षयेंऽशुमान् यथाऽविर्भवति, तथाऽत्मापीत्यर्थः ॥४३॥

आत्मा तु सततं प्राप्तोऽप्यप्राप्तवदविद्यया तन्नाशे प्राप्तवद् भाति स्वकण्ठाभरणं यथा ४४

आत्मा सर्वदा परोक्षस्वभावत्वादप्राप्त एव, स आत्मा कदा प्राप्नो भवेदिति शिष्याभिप्रायमाशङ्क्याह -- आत्मा तु सततमिति । आत्म सर्वत्र पूर्णोऽद्वयानन्दरूपः सर्वदा प्राप्त एवाविद्यावशाद् भ्रान्त्या अप्राप्त एवाभाति, तन्नाशे तदावरणाविद्यानाशे वाक्यश्रवणात् प्राप्त इवाभाति कण्ठगतचामीकरन्यायेनेत्यर्थः ॥४४॥

स्थाणौ पुरुषवद् भ्रान्त्या कृता ब्रह्मणि जीवता जीवस्य तात्त्विके रूपे तस्मिन् दृष्टे निवर्तते ४५

ननु -- जीवस्य परमात्मनैक्यमयुक्तं, परमात्मनो जीवत्वविरोधस्वभावत्वात् तत्राह -- स्थाणाविति । यथान्धकारस्थिते स्थाणौ पुरुषोऽयमिति चोरशङ्कया विभ्यति, तथैवाविचारात्

ब्रह्मणि जीवत्वमारोप्यते, तथा शास्त्रोपदेशजनितविवेकदृष्ट्या तस्य जीवस्य तत्त्विकरूपे लक्ष्ये तत्त्वंपदार्थे दृष्टे जाते ब्रह्मणि भ्रान्त्या कल्पितत्वाज्जीवत्वमपि निवर्तते, ब्रह्मैवाहमिति जानातीत्यर्थः ॥४५॥

तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञानमञ्चसा
अहं ममेति चाज्ञानं बाधते दिग्भ्रमादिवत् ४६

अहं ममेति प्रत्यये जाग्रति कथं नाहमिति प्रत्यय इत्याशङ्क्य, तदपि तथैव मृषा इत्याह -- तत्त्वस्वरूपेति । जीवप्रमात्मनोरेकत्वानुभवादुत्पन्नं यज्ज्ञानं, तदहं ममेत्यज्ञानं बाधते, दिग्भ्रमादिवदिति भानुदर्शनादित्यर्थः ॥४६॥

सम्यग्विज्ञानवान् योगी स्वात्मनेवाखिलं स्थितम्
एकं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा ४७

अहं ममेति प्रत्यये नष्टे योगी सम्यग्विवेकवान् सन् विज्ञानेन चक्षुषा सर्वं दृश्यं प्रपञ्चं स्वात्मन्येवानुभवेन पश्यतीत्याह -- सम्यगिति । एकमात्मानं सर्वं पश्यति, तदा तद्रूपो भवतीति भावः ॥४७॥

आत्मैवेदं जगत् सर्वमात्मनोऽन्यन्न विद्यते[10]
मृदो यद्वद्घटादीनि स्वात्मानं सर्वमीक्षते ४८

ननु -- आत्मा सर्वं न भवति प्रत्यक्षविरोधात्, नानात्वेन दृश्यमानमिदं सर्वं कथमात्मन्यभेदेन पश्यतीत्याह -- आत्मैवेदमिति । इदं सर्वं जगदात्मैवात्मकार्यत्वादतोऽन्यदात्मनो न किञ्चिद्विद्यते, यथा घटशरावादिकार्यं मृदोऽन्यन्नास्ति । अतः स्वात्मन्येव सर्वं दृश्यजातमभेदेनेक्षते पश्यति, वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः (छा०उ०६,१)॥४८॥

जीवन्मुक्तस्य तद्विद्वान् पूर्वोपाधिगुणांस्यजेत्
स सच्चिदादिधर्मत्वं भजेद् भ्रमरकीटवत् ४९

एवंभूतावस्थैव जीवन्मुक्तिरित्याह -- जीवन्मुक्तिस्त्विवति । अनाद्यविद्यापरिकल्पितपूर्वोपाधिं देहमनोबुद्ध्यादीन् गुणान् सत्त्वादीन् परिज्यजेत्, तदैव जीवन्मुक्त इत्युच्यते । स जीवन्मुक्तः सच्चिदानन्दादिगुनकत्वाद् भ्रमरकीटवत् साक्षाद्ब्रह्म भजेत् प्राप्नोतीत्यर्थः ॥४९॥

---

[10] किञ्चन इति पाठान्तरम्

> तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान्
> योगी शान्तिसमायुक्त आत्मारामो विराजते ५०

तत्त्वज्ञस्तु आत्मारामः सुखं तिष्ठतीत्याह -- तीर्त्वा मोहार्णवमिति । मोह एव अर्णवोऽपर्यन्तत्वात्, तं ज्ञानप्लवेन तीर्त्वा, निःशेषं नाशयित्वा, रागद्वेषादय एव राक्षसा मोक्षपरिपन्थिनः, तान् निःशेषतो नाशयित्वा शान्तिसमायुक्तः शमदमादिसहित आत्माराम आत्मन्येव आत्मारामः क्रीडा यस्य स विराजते स्वाराज्येनाभिषिक्तः प्रकाशते । अर्थान्तरं ध्वन्यते -- श्रीरामः समुद्रं तीर्त्वा रावणादिराक्षसान् हत्वा, सीता एवा शान्तिस्तया समेतो विराजते, अयोध्यायां विजृम्भते ॥५०॥

> बाह्यानित्यसुखासक्तिं हित्वाऽऽत्मसुखनिर्वृतः
> घटस्थदीपवच्छश्वदन्तरेव प्रकाशते ५१

जीवन्मुक्तस्य लक्षणमाह -- बाह्यानित्येति । बाह्येन्द्रियविषयोद्भवामनित्यसुखस्यासक्तिं प्रीतिं सवासनां हित्वा, तत्र हेतुरात्मसुखेन निर्वृतः । घटस्थदीपवदन्तरेव प्रकाशते, स्वसाक्षिकमेवात्मानुभवसुखमितरैर्न ज्ञायते इत्यर्थः ॥५१॥

> उपाधिस्थोऽपि तद्धर्मैरलिप्तो व्योमवन्मुनिः
> सर्वविन्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत् ५२

एवमुक्तप्रकारेण जीवन्मुक्तः सन्नारब्धसंक्षयादेवं वर्तितव्यमित्याह -- उपाधिस्थोऽपीति । देहाद्युपाधौ साक्षितया स्थितोऽपि मुनिर्व्योमवत् तद्धर्मैर्नानुलिप्तः, मम कर्मलेपो नास्तीति भावयेत् । सर्वज्ञोऽपि मूढवत् प्राकृतवत् तिष्ठेत्, सर्वत्र विषयेषु यदृच्छाप्राप्तेष्वनासक्तो वायुवच्चरेत् ॥५२॥

> उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः
> जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा ५३

प्रारब्धकर्मक्षये देहोपाधौ लीने विदेहकैवल्यमाह -- उपाधिविलयादिति । उपाधिभूतहेदद्वयले प्रारब्धकर्मक्षये मुनिर्योगी विष्णौ सर्वव्यापके परब्रह्मणि निर्विशेषं यथा भवेत्, तथा विशेत् । अत्यन्तैक्ये दृष्टान्तो जले जलमित्यादि ॥५३॥

यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम्
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ५४

ब्रह्मणः सर्वाधिष्ठानत्वात् तटस्थलक्षणेनाभिधीयते श्लोकद्वयेन -- यल्लाभादित्यादि । यद्ब्रह्मसाक्षात्कारलाभाद्परो लाभो न विद्यते, सर्वलाभानां तत्रैवान्तर्भावात्, यथा ब्रह्मानन्दे क्षुद्रानन्दानामन्तर्भावः । यद्सुखाद्ब्रह्मानुभवसुखादपरं सुखं नास्ति, निरतिशयसुखत्वात् । यज्ज्ञानाद् ब्रह्मसाक्षात्कारज्ञानादपरं ज्ञानं नास्ति, मोक्षहेतुत्वात् । ब्रह्मेति तज्जानीयात् ॥५४॥

यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः
यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ५५

तद्दृष्ट्वेति । तद्दृष्ट्वाऽपरं द्रष्टव्यं नास्ति, तेनैव पुरुषार्थस्य सिद्धत्वात् । तद्भूत्वा येनैक्यं प्राप्य पुनर्जन्मादिकं नास्ति । यज्ज्ञात्वा यत्स्वरूपं ज्ञात्वाऽन्यज्ज्ञेयं नास्ति, तदैव ब्रह्मेत्यवधारयेत् । अन्यत् सर्वं वृथा पाण्डित्यमित्यर्थः ॥५५॥

तिर्यगूर्ध्वमधः पूर्णं सच्चिदानन्दमद्वयम्
अखण्डं[11] नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत् ५६

तिर्यगूर्ध्वमधः सर्वत्र ब्रह्मैव पूर्णमित्याह -- तिर्यगूर्ध्वमिति स्पष्टोऽर्थः ॥५६॥

अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽव्ययम्
अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत् ५७

अखण्डानन्दमेकं ब्रह्म वेदान्तैरतद्व्यावृत्तिरूपेणातन्निरसनद्वारा ज्ञातव्यमित्याह -- अतद्व्यावृत्तिरूपेणेति । स्पष्टोऽर्थः ॥५७॥

अखण्डानन्दरूपस्य तस्यानन्दलवाश्रिताः
ब्रह्माद्यास्तारतम्येन भवन्त्यानन्दिनोऽखिलाः ५८

ननु -- ब्रह्मादयोऽपि निरतिशयानन्दिन एव श्रूयन्ते, तत्राह -- अखण्डेत्यादि । ब्रह्मेन्द्रादयः परिच्छिन्नानन्दिन एव, ब्रह्म तु अखण्डानन्दरूपत्वादपरिच्छिन्नमानन्दम् एव स्वरूपं यस्य तस्य आनन्दलेशमाश्रित्य ब्रह्मेन्द्रादयोऽप्यानन्दिनो भवति आनन्दतारतम्येण, एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीत्यादिश्रुतेः (बृ०उ०४,३) ॥५८॥

---

[11] अनन्तम् इति पाठान्तरम्

तद्युक्तमखिलं वस्तु व्यवहारश्चिदन्वितः
तस्मात् सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ५९

ननु -- यदि परमप्रेमास्पदमात्मैव भातीत्युच्यते, तदा कथं देहादिप्रपञ्चोऽपि प्रियतरोऽनुभूयते इत्याशङ्क्याह -- तद्युक्तिमिति । अखिलदेहाद्यनात्मस्त्वपि तत्, तेनात्मना संयुक्तमेव प्रियतरं लौकिकोऽपि व्यवहारस्तदुक्त एव प्रियतरः । तस्मात् सर्वगतं ब्रह्म अनन्तरं प्रियं, यथा क्षीरं सर्वं व्याप्य घृतमिति एवमवस्त्वपि ब्रह्मव्याप्तत्वात् प्रियमिव भाति । अत आत्मैव प्रियतम इति सिद्धम् ॥५९॥

अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययम्
अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत् ६०

तर्ह्यात्मा केन प्रकारेण सर्वं व्याप्य तिष्ठतीत्याशङ्क्य, साक्षाद्वक्तुमशक्यत्वादनणु अस्थूलमिति श्रुतेः (बृ०उ०३,८) सत्तारूपेण भातीत्याह -- अनणवस्थूलमिति स्पष्टार्थः ॥६०॥

यद्भासा भास्यतेऽर्कादि भास्यैर्यत्तु न भास्यते
येन सर्वमिदं भाति तद्ब्रह्मेत्यवधारयेत् ६१

पुनस्तद्ब्रह्मेति ज्ञानार्थं श्लोकत्रयेन पृथङ्निरूपयति -- यद्भासेति । यद्वस्तु भान्वादीन् भासयेत्, यच्च भास्यैरर्कादिभिर्नैव भास्यते, "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" (क०उ०२,२) इति श्रुतेः । तेन सर्वमिदं भूतभौतिकभावरूपं जगद्भाति तद्ब्रह्मेति जानीयात् ॥६१॥

स्वयमन्तर्बहिर्व्याप्य भासयन्नखिलं जगत्
ब्रह्म प्रकाशते बह्विप्रतप्तायसपिण्डवत् ६२

तप्तायःपिण्डवत् स्वयमेवान्तर्बहिर्व्याप्य भासयन्नखिलं ब्रह्म प्रकाशते इत्याह -- स्वयमन्तरिति । स्पष्टोऽर्थः ॥६२॥

जगद्विलक्षणं ब्रह्म ब्रह्मणोऽन्यन्न किञ्चन
ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ६३

पुनस्तदेवाह -- जगद्विलक्षणमिति । कर्वं ब्रह्मैव सत्यं, तथापि जगद्रूपेण यदा पश्यति, तदा न गृह्यते, जगद्वैलक्षण्येन तत्कारणत्वेन विचार्यते चेत्, तदा ज्ञातुं शक्यं ब्रह्मणोऽन्यन्न विद्यते ।

यदितोऽन्यद्दृश्यते यत्किञ्चित्, तन्मृषैव मरुमरीचिकावन्निर्जलदेशस्थसूर्यकिरणारोपित-जलवदित्यर्थः ॥६३॥

दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत् तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमव्ययम् ६४

पुनस्तदेव ब्रह्म स्फुटं निरूपयति -- दृश्यत इति । चक्षुषा यद्दृश्यते, श्रूयते यद्यच्छ्रोत्रेण, यद्यन्मनसा स्मर्यते, वाचा यद् यदभिधीयते, तत्त्वज्ञानात् तत्सर्वं ब्रह्म सच्चिदानन्दमद्व्यं, ब्रह्मान्यन्न किञ्चिदस्तीत्यर्थः ॥६४॥

सर्वगं सच्चिदानन्दं ज्ञानचक्षुर्निरीक्षते अज्ञानचक्षुर्नेक्षेते भास्वन्तं भानुमन्धवत् ६५

सर्वगमिति । श्रुतिश्च -- "च चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा । ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान" (मु०उ०३,१) इति । यदि सर्वगतं ब्रह्म, तर्हि सर्वैः किं न दृश्यत इत्याशङ्क्य, चक्षुरादिभिर्न गृह्यते इति तत् श्रुत्या प्रतिपादयति । योऽज्ञानचक्षुः स सर्वगमपि सच्चिदानन्दं ब्रह्म न पश्यति, यया प्रकाशमानमपि भानुमन्धो न पश्यति । ज्ञानप्रसादेन ज्ञानचक्षुषा सर्वत्र ब्रह्मैव पश्यतीत्यर्थः ॥६५॥

श्रवणादिभिरुद्दीप्तज्ञानाग्निपरितापितः जीवः सर्वमलान्मुक्तः स्वर्नवद्द्योतते[12] स्वयम् ६६

एवं तावदुक्तरीत्याऽनुभवसंपन्नस्यापि तदभ्यासरहतस्य वासनावशात् किञ्चिदज्ञानं संभवति, तत्परिहारार्थं पुनः श्रवणादिकं कुर्यादित्याह -- श्रवणादिभिरिति । जीवः प्रत्यगात्मा एतत्प्रकारेण उक्तार्थस्य श्रवणमननादिभिरुच्चैर्दीप्तः प्रकाशित ज्ञानमेवाग्निस्तेन परितापितः परितो विशेषतश्च शोधित इत्यर्थः । सर्वसंसारमूलाज्ञानमलान्मुक्तः स्वयमेव सम्यक् प्रकाशते, यथाऽग्निना परितापितं सुवर्णं प्रकाशते ॥६६॥

[12] दृश्यते इति पाठान्तरम्

> हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोऽपहृत्
> सर्वव्यापी सर्वधारी भाति भासयतेऽखिलम् ६७

एवं विशोधितो जीवः परमात्मा हृदाकाशे उदितः सन् तमोऽज्ञानमुपसंहरन् भानुवत् सर्वस्वरूपप्रकाश इत्याह -- हृदाकाशोदित इति । आत्मबोध एव भानुः, सर्वस्याधारभूतत्वात् सर्वव्यापी सर्वधारी च, शेषं स्पष्टम् ॥६७॥

> दिग्देशकालाद्यनपेक्ष्य सर्वगं
> शीतादिहृन्नित्यसुखं निरञ्जनम्
> यः स्वात्मतीर्थं भजते विनिष्क्रियः
> स सर्ववित् सर्वगतोऽमृतो भवेत् ६८

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ आत्मबोधः संपूर्णः ॥

ननु -- आत्मज्ञस्यापि ज्ञानप्रतिबन्धकदुरितनिवारणार्थं प्रयागादितीर्थयात्रोद्योगः कर्तव्य इत्याशङ्क्य, स्वात्मतीर्थे स्नातस्य न किञ्चित् कर्तव्यमपीत्याह -- दिग्देशकालादीति । यो निविष्क्रियः परमहंसः आत्मतीर्थं भजते, स सर्ववित् सर्वज्ञः सर्वत्रगः परमात्मस्वरूपत्वादमृतो मुक्तो भवेत् । कथुंभूतं स्वात्मतीर्थम् ? दिग्देशकालाद्यनपेक्ष्यैव सर्वगतं शीतादिद्वन्द्वदुःखादि हरतीति शीतादिहृत्, नित्यसुखं मोक्षानन्दप्रापकत्वात्, इतरतीर्थेषु तद्विपरीतं द्रष्टव्यम् । तस्मादात्मतीर्थे स्नातस्य न किञ्चिदवशिष्यत इति भावः ॥६८॥

॥ इति आत्मबोधटीका संपूर्णा ॥

अकारादिश्लोकसूची

अपरोक्षानुभूतिः

अङ्गानां समतां विद्यात् अप०११५
अज्ञानप्रभवं सर्वम् अप०१४
अथ शुद्धं भवेद्वस्तु अप०१३६
अदृश्यं भावरूपं च अप०१४१
अनुभूतोऽप्ययं लोकः अप०५६
अनेनैव प्रकारेण अप०१३७
अपरोक्षानुभूतिर्वै अप०२
अभ्रेषु सत्सु धावत्सु अप०८४
अयमात्मा हि ब्रह्मैव अप०५५
अलातं भ्रमणेनैव अप०७९
असङ्गः पुरुषः प्रोक्तः अप०३६
अहं द्रष्टृतया सिद्धः अप०३२
अहं विकारहीनस्तु अप०३३
अहंशब्देन विख्यातः अप०३१
अहमेकोऽपि सूक्ष्मश्च अप०१६
आत्मनस्तत्प्रकाशत्वम् अप०२२
आत्मा ज्ञानमयः पुण्यः अप०१९
आत्मा नित्यो हि सद्रूपः अप०२१
आत्मा नियामकश्चान्तः अप०१८
आत्मा प्रकाशकः स्वच्छः अप०२०
आत्मा विनिष्कलो ह्येकः अप०१७
आत्मानं सततं जानन् अप०८९
आदावन्ते च मध्ये च अप०११०
इति वा तद्भवेन्मौनम् अप०१०९
इत्यात्मदेहभागेन अप०४१
इत्यात्मदेहभेदेन अप०४२
इमं चाकृत्रिमानन्दम् अप०१२५
उक्तसाधनयुक्तेन अप०१०
उच्यतेऽज्ञैर्बलाच्चैतत् अप०९९
उत्पन्नेऽप्यात्मविज्ञाने अप०९०
उपादानं प्रपञ्चस्य अप०४५
उपादानं प्रपञ्चस्य अप०९४
एतयोर्यदुपादानम् अप०१५
एभिरङ्गैः समायुक्तः अप०१४३
एवं देहद्वयादन्यः अप०४०
एवमात्मन्यविद्यातः अप०८७
कनकं कुण्डलत्वेन अप०७२
कर्म जन्मान्तरीयं यत् अप०९२
कलनात् सर्वभूतानाम् अप०१११
काचभूमौ जलत्वं वा अप०८२
कारणं व्यतिरेकेण अप०१३८
कार्यकारणता नित्यम् अप०६६
कार्ये कारणताऽऽयाता अप०१३५
कार्ये हि कारणं पश्येत् अप०१३९
कुशला ब्रह्मवार्तायाम् अप०१३३
कोऽहं कथमिदं जातं अप०१२
क्षीयन्ते चास्य कर्माणि अप०९८
गृहत्वेनेव काष्ठानि अप०७४
गृह्यमाणे घटे यद्वत् अप०६७
घटत्वेन यथा पृथ्वी अप०७१
घटनाम्ना यथा पृथ्वी अप०६४
चक्षुर्भ्यां भ्रमशीलाभ्याम् अप०७८
चित्तादिसर्वभावेषु अप०११८
चैतन्यस्यैकरूपत्वात् अप०४३
ततः साधननिर्मुक्तः अप०१२६
ततस्तद्वृत्तिनैश्चल्यम् अप०१२०
तत्त्वज्ञानोदयादूर्ध्वम् अप०९१
तत्रैव च समाख्यातः अप०३७
त्यागः प्रपञ्चरूपस्य अप०१०६
त्रयमेव भवेन्मिथ्या अप०५८
त्रिपञ्चाङ्गान्यथो वक्ष्ये अप०१००
दृश्यं ह्यदृश्यतां नीत्वा अप०१४२
दृष्टिं ज्ञानमयीं कृत्वा अप०११६
दृष्टिदर्शनदृश्यानाम् अप०११७
देहस्यापि प्रपञ्चत्वात् अप०९७
देहोऽहमित्ययं मूढः अप०२३
दोषोऽपि विहितः श्रुत्या अप०४८
नाहं भूतगणो देहः अप०१३

निगमाचार्यवाक्येषु अप०८
नित्यमात्मस्वरूपं हि अप०५
नित्याभ्यासादृते प्राप्तिः अप०१०१
निमेषार्धं न तिष्ठन्ति अप०१३४
निरामयो निराभासः अप०२६
निर्गुणो निष्क्रियो नित्यः अप०२७
निर्मलो निश्चलोऽनन्तः अप०२८
निर्विकारतया वृत्त्या अप०१२४
निर्विकारो निराकारः अप०२५
निषेधनं प्रपञ्चस्य अप०११९
नोत्पद्यते विना ज्ञानं अप०११
परिपक्वं मनो येषाम् अप०१४४
पीतत्वं हि यथा शुभ्रे अप०७७
पुरुषत्वे यथा स्थाणुः अप०७३
पोतेन गच्छतः पुंसः अप०७६
प्राणसंयमनं चैव अप०१०३
प्रोक्तोऽपि कर्मकाण्डेन अप०३८
ब्रह्मणः सर्वभूतानि अप०४९
ब्रह्मादिस्थावरान्तेषु अप०४
ब्रह्मैव सर्वनामानि अप०५०
ब्रह्मैवास्मीति सद्वृत्त्या अप०१२३
ब्रह्मैवाहं समः शान्तः अप०२४
भाववृत्त्या हि भावत्वम् अप०१२९
भावितं तीव्रवेगेन अप०१४०
महत्त्वे सर्ववस्तूनाम् अप०८०
यत्र यत्र मनो याति अप०१२२
यत्राज्ञानाद्भवेद् द्वैतम् अप०५३
यथा तरङ्गकल्लोलैः अप०६३
यथा मृदि घटो नाम अप०६०
यथा रज्जुं परित्यज्य अप०९५
यथा वृक्षविपर्यासः अप०७५
यथा शशी जले भाति अप०८६
यथैव दिग्विपर्यासः अप०८५
यथैव मृन्मयः कुम्भः अप०६९
यथैव व्योम्नि नीलत्वम् अप०६१
यथैव शून्ये वैतालः अप०६२
यद्वदग्नौ मणित्वं हि अप०८३
यद्वन्मृदि घटभ्रान्तिम् अप०५९
यन्मूलं सर्वभूतानाम् अप०११४
यमो हि नियमस्त्यागः अप०१०२
यस्माद्वाचो निवर्तन्ते अप०१०७
यस्मिन् सर्वाणि भूतानि अप०५४
ये हि वृत्तिं जहत्येनाम् अप०१३०
ये हि वृत्तिं विजानन्ति अप०१३१
येषां वृत्तिः समा वृद्धा अप०१३२
रज्जुरूपे परिज्ञाते अप०९६
रज्ज्वज्ञानात् क्षणेनैव अप०४४
लयस्तमश्च विक्षेपः अप०१२८
लिङ्गं चानेकसंयुक्तम् अप०३९
वाचो यस्मान्निवर्तन्ते अप०१०८
विनिर्णीतं विमूढेन अप०३४
विषयेभ्यः परावृत्तिः अप०७
विषयेष्वात्मतां दृष्ट्वा अप०१२१
व्याप्यव्यापकता मिथ्या अप०४६
श्रीहरिं परमानन्दम् अप०१
श्रुत्या निवारितं नूनं अप०४७
संसारबन्धनिर्मुक्तिः अप०९
सजातीयप्रवाहश्च अप०१०५
सदैव वासनात्यागः अप०६
सदैवात्मा विशुद्धोऽस्ति अप०६८
समाधौ क्रियमाणे तु अप०१२७
सर्पत्वेन यथा रज्जुः अप०७०
सर्वं पुरुष एवेति अप०३५
सर्वं ब्रह्मेति विज्ञानात् अप०१०४
सर्वमात्मतया ज्ञातम् अप०८८
सर्वोऽपि व्यवहारस्तु अप०६५
सिद्धं यत् सर्वभूतादि अप०११३
सुखेनैव भवेद्यस्मिन् अप०११२
सुवर्णाजायमानस्य अप०५१
सूक्ष्मत्वे सर्वभावानां अप०८१
स्वदेहे शोभनं सन्तम् अप०२९
स्वप्नदेहो यथाऽध्यस्तः अप०९३
स्वप्नो जागरणेऽलीकः अप०५७
स्वल्पमप्यन्तरं कृत्वा अप०५२
स्ववर्णाश्रमधर्मेण अप०३
स्वात्मानं शृणु मूर्ख त्वम् अप०३०

आत्मबोधः

अखण्डानन्दरूपस्य .... आत्म०५८
अज्ञानकलुषं जीवम् .... आत्म०५
अज्ञानान्मानसोपाधेः .... आत्म०२२
अतद्व्यावृत्तिरूपेण .... आत्म०५७
अनण्वस्थूलमह्रस्वम् .... आत्म०६०
अनाद्यविद्यानिर्वाच्या .... आत्म०१४
अमनस्त्वान्न मे दुःख० .... आत्म०३३
अरुणेनेव बोधेन .... आत्म०४३
अवरोधितया कर्म .... आत्म०३
अहमाकाशवत् सर्वम् .... आत्म०३५
आत्मचैतन्यमाश्रित्य .... आत्म०२०
आत्मनः सच्चिदंशश्च .... आत्म०२५
आत्मनो विक्रिया नास्ति ...... आत्म०२६
आत्मन्येवाखिलं दृश्यम् .... आत्म०३९
आत्मा तु सततं प्राप्तः .... आत्म०४४
आत्माऽवभासयत्येकः .... आत्म०२८
आत्मैवेदं जगत् सर्वम् .... आत्म०४८
आविद्यकं शरीरादि .... आत्म०३१
उपादानेऽखिलाधारे .... आत्म०८
उपाधिविलयाद्विष्णौ .... आत्म०५३
उपाधिस्थोऽपि तद्धर्मैः........... आत्म०५२
एवं निरन्तरकृता .... आत्म०३७
एवमात्मारणौ ध्यान० .... आत्म०४२
जगद्विलक्षणं ब्रह्म .... आत्म०६३
जीवन्मुक्तस्य तद्विद्वान् .... आत्म०४९
ज्ञातृज्ञानज्ञेयभेदः .... आत्म०४१
तत्त्वस्वरूपानुभवात् .... आत्म०४६
तद्युक्तमखिलं वस्तु .... आत्म०५९
तपोभिः क्षीणपापानाम्.......... आत्म०१
तावत् सत्यं जगद्भाति .... आत्म०७
तिर्यगूर्ध्वमधः पूर्णम् .... आत्म०५६
तीर्त्वा मोहार्णवं हत्वा .... आत्म०५०
दिग्देशकालाद्यनपेक्ष्य सर्वगम् आत्म०५८
दृश्यते श्रूयते यद्यद् .... आत्म०६४
देहान्यत्वान्न मे जन्म .... आत्म०३२
देहेन्द्रियगुणान् कर्मणि.......... आत्म०२१
देहेन्द्रियमनोबुद्धि० .... आत्म०१८
नानोपाधिवशादेव .... आत्म०११
नित्यशुद्धविमुक्तैकम् .... आत्म०३६
निर्गुणो निष्क्रियो नित्यः ...... आत्म०३४
निषिध्य निखिलोपाधीन्....... आत्म०३०
पञ्चकोशादियोगेन .... आत्म०१५
पञ्चप्राणमनोबुद्धि० .... आत्म०१३
पञ्चीकृतमहाभूत० .... आत्म०१२
परिच्छिन्न इवाज्ञानात् .... आत्म०४
प्रकाशोऽर्कस्य तोयस्य .... आत्म०२४
बाह्यानित्यसुखासक्तिम् .... आत्म०५१
बोधोऽन्यसाधनेभ्यो हि .... आत्म०२
यथाकाशो हृषीदेशः .... आत्म०१०
यद्दृष्ट्वा नापरं दृश्यम् .... आत्म०५५
यद्भासा भास्यतेऽर्कादि .... आत्म०६१
यल्लाभान्नापरो लाभः .... आत्म०५४
रज्जुसर्पवदात्मानम् .... आत्म०२७
रागेच्छासुखदुःखादि .... आत्म०२३
रूपवर्णादिकं सर्वम् .... आत्म०४०
वपुस्तुषादिभिः कोशैः.......... आत्म०१६
विविक्तदेश आसीनः .... आत्म०३८
व्यापृतेष्विन्द्रियेष्वात्मा .... आत्म०१९
श्रवणादिभिरुद्दीप्त० .... आत्म०६६
संसारो स्वप्नतुल्यो हि .... आत्म०६
सच्चिदात्मन्यनुस्यूते .... आत्म०९
सदा सर्वगतोऽप्यात्मा .... आत्म०१७
सम्यग्विज्ञानवान् योगी .... आत्म०४७
सर्वगं सच्चिदानन्दम् .... आत्म०६५
स्थाणौ पुरुषवद् भ्रान्त्या .... आत्म०४५
स्वबोधे नान्यबोधेच्छा .... आत्म०२९
स्वयमन्तर्बहिर्व्याप्य .... आत्म०६२
हृदाकाशोदितो ह्यात्मा .... आत्म०६७

॥ इत्यकारादिश्लोकसूची ॥

ग्रन्थऋणम्

अखण्डानन्दसरस्वती । अपरोक्षानुभूति प्रवचन । सत्साहित्यप्रकाशनट्रस्ट । बम्बई १९७० ॥
दीनेशचन्द्रभट्टाचार्यशास्त्री । आत्मबोधप्रकरणम् । कलिकाता संस्कृत कलेज १९६१ ॥
पी॰ एन्॰ मेनन् । आत्मबोधः । पालक्काद् १९६४ ॥
विमुक्तानन्दः । अपरोक्षानुभूतिः । अद्वैत-आश्रमः १९९३ ॥ (आङ्ग्लभाषा)
सुब्रह्मण्यशास्त्री । प्रकरणाष्टकम् । महेश-अनुसन्धान-संस्थानम् । वाराणसी १९९७ ॥

॥ इति शम् ॥

॥ ग्रन्थोऽयं समाप्तः ॥